(M-34)

४३ S.K.M. 104/89 (F)

श्रीमद् भागवते (षष्ठ स्कन्ध)

समय 18 वीं० श०

पत्र 41

भाषा संस्कृत

॥श्रीगणेशाय नमः॥ पुल्पारण्ये नृसिंहो विराजते ॥ यन्नादतः पलायंते महाकल्मषकुंजराः १
विसर्गसंभवान् जीवान् स्वमर्यादामुसंस्थितान् ॥ विष्णुः पाति खिलेरूपैरित्येवं पंचमे स्थितं २
अध्याये कोनविंशत्याषष्ठे पोषणमुच्यते ॥ अतिलिंघितमर्याद भक्तोरक्षणलक्षणं ॥३॥
अजामिलो मनुष्येषु महापापो य[...]वितः ॥ विश्वरूपादिघाती च तथा दै[...]षु वासवः ॥४
अजामिलस्य भक्तत्वं विष्णुदूतैर्निरूपितं संकेत भगवन्नाम पुत्रस्नेहानुषंगजं ॥ इंद्रोपि
भगवद्भक्तः सख्येनोपेंद्रसेवकः तदधीन सुरैश्वर्यः शत्रुनिर्जयजो विभुः ॥६॥ तत्रादौ
त्रिभिरध्यायैरजामिलकथोच्यते ॥ विश्वरूपकथा षड्भिरिंद्रदोषो जयेततः ॥७॥ इंद्रस्य वृत्र
हेशोक्ति दृत्राख्यानं ततोष्टमिः ॥ द्वाभ्यां च मरुदाख्यानमेवं प्रकरणक्रमः ॥८॥ तत्रादौ प्रथमे
विष्णोर्दूतैः पातकमोचने ॥ तत्याप ख्यापनायोक्तं मान्येर्द्धमीदिलक्षणं ॥९॥ अथ षष्ठस्कंध
व्याख्या ॥ पूर्वोक्तानुवादपूर्वकं निरंतरोक्त नरक परिहारो पायं पृच्छति निवृत्तिमार्ग इति ष
ड्भिः ॥ आदौ द्वितीयस्कंधे ॥ वैश्वानरयातीत्यादिना ॥ भगवतात्वयाय यावत् ॥ यत्स्येनमार्गेण ॥

५०
क्रमेणयोगेनार्चिरादिप्राप्तिःतेनोपलब्धो ब्रह्मा तेनसहनसंसृतिर्मोक्षोभवति॥ ब्रह्मणासह
तेसर्वेसंप्राप्तेप्रतिसंचरे॥ परस्यांते कृतात्मनः प्रविशंतिपरंपदमितिवचनात्॥१॥ ॥
॥राजोवाच॥ निवृत्तिमार्गः कथितआदौभगवतायथा॥ क्रमयोगोपलब्धेनब्रह्मणा
यदसंसृतिः॥१॥ प्रवृत्तिलक्षणश्चैवत्रैगुण्यविषयोमुने॥ योसावलीनप्रकृतेर्गु
णसर्गः पुनः पुनः॥२॥ अधर्मलक्षणानानानरकाश्चानुवर्णिताः॥ मन्वंतरश्चव्याख्या
तःआद्यःस्वायंभुवोयतः॥३॥ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानिच॥ द्वीपवर्षसमु
द्राद्रिनद्युद्यानवनस्पतीन्॥४॥ धरामंडलसंस्थानंभागलक्षणमानतः॥ ज्यो
तिषांविवराणांचयथेदमसृजद्विभुः॥५॥ अधुनेहमहाभागयथैवनरकान्नरः॥
नानोग्रयातनान्नेयात्तन्मेव्याख्यातुमर्हसि॥६॥ श्रीशुकउवाच॥ नचेदिहैवापचि
तिंयथांहसः कृतस्यकुर्यान्मनउक्तिपाणिभिः॥ ध्रुवंसवैप्रेत्यनरकानुपैतियेकीर्ति राम०
तामेभवतस्तिग्मयातनाः॥७॥ तस्मात्पुरैवाश्विहपापनिष्कृतौयतेतमृत्योरविपद्यता १
त्मना॥ दोषस्यदृष्ट्वागुरुलाघवंयथाभिषक्चिकित्सेतरुजांनिदानवित्॥८॥ राजो

वाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनाहितं ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथं ॥
क्वचिन्निवर्ततेभद्रात् क्वचिच्चरति तत्पुनः ॥ प्रायश्चित्तमथोपार्थं मन्ये कुंजरशौचवत् ॥ १०
श्रीशुको वाच ॥ कर्मणाकर्म निनिर्हारो न ह्यात्यंतिक इष्यते ॥ अविद्वदधिकारित्वात्प्राय
श्चित्तं विमर्शनं ॥ ११ ॥ नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंतिहि ॥ एवं नियमकृद्राजन् श
नैः क्षेमाय कल्पते ॥ १२ ॥ तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां य
मेन नियमेनुच ॥ १३ ॥ देहवाक्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि
वेणुगुल्ममिवानलः ॥ १४ ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति का
र्त्स्न्येन निहारमिव भास्करः ॥ १५ ॥ न तथा ह्यघवान्राजन् पूयेत तपआदिभिः ॥ यथा कृ
ष्णार्पितप्राणस्तत्पुरुषनिषेवया ॥ १६ ॥ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोकुतोभयः ॥ सु
शीलाः साधवो यत्र नारायणपरायणाः ॥ १७ ॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं ॥
न निष्पुनंति राजेंद्र सुराकुंभमिवापगाः ॥ १८ ॥ सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुण
रागियैरिह ॥ न ते यमं पाशभृतश्च तद्भटान् स्वप्नेपि पश्यंति हि चीर्णनिष्कृताः ॥ १९ ॥ अत्र चोदा

मा०प०
२

रंतीममितिहासंपुरातनं॥दूतानांविष्णुयमयोःसंवादस्तंनिबोधमे॥२०॥कान्यकुब्जे
द्विजःकश्चिद्दासीपतिरजामिलः॥नाम्नानष्टसदाचारोदास्याःसंसर्गदूषितः॥२१॥वं
द्यक्षैःकैतवैश्चौर्यैर्गर्हितांवृत्तिमास्थितः॥बिभ्रत्कुटुंबमशुचिर्यातयामासदेहिनः॥२२॥
एवंनिवसतस्तस्यलालयानस्यतत्सुतान्॥कालोत्यगान्महान्राजन्नष्टाशीतिसमा
युषः॥२३॥तस्यप्रवयसःपुत्राःदशतेषांचयोऽवमः॥बालोनारायणोनाम्नापित्रोश्च
दयितोभृशं॥२४॥सबद्धहृदयस्तस्मिन्नर्भकेकलभाषिणि॥निरीक्षमाणस्तल्लीलं
मुमुदेजरठोभृशं॥२५॥भुंजानःप्रपिबन्खादन्बालकंस्नेहयंत्रितः॥भोजयन्पायय
न्मूढोनवेदागतमंतकं॥२६॥सएवंवर्तमानोज्ञोमृत्युकालउपस्थिते॥मतिंचकार
तनयेबालेनारायणात्मके॥२७॥सपाशहस्तांस्त्रीन्दृष्ट्वापुरुषान्भृशदारुणान्॥वक्र
तुंडानूर्ध्वरोम्णःआत्मानंनेतुमागतान्॥२८॥दूरेक्रीडनकासक्तंपुत्रंनारायणाह्वयं॥प्ला
वितेनस्वरेणोच्चैराजुहावाकुलेंद्रियः॥२९॥निशम्यम्रियमाणस्यमुखतोहरिकीर्तनं॥
भर्तुर्नाममहाराजपार्षदाःसहसापतन्॥३०॥विकर्षतोंतर्हृदयाद्दासीपतिमजामिलं॥यम
प्रेष्यान्विष्णुदूतावारयामासुरोजसा॥३१॥ऊचुर्निषेधितास्तांस्तेवैवस्वतपुरःसराः॥के

राम०
२

यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ॥३१॥ कस्य वा कुत आयाता कस्मादस्य निषेधथ ॥ किं देवा
उपदेवा वा यूयं किं सिद्धसत्तमाः ॥३३॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥ किरीटिनः
कुंडलिनो लसत्पुष्करमालिनः ॥३४॥ सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ॥ धनुर्निषंगा
संखचक्रांबुजश्रियः ॥३५॥ दिशो वितिमिरालोकाः कुर्वंतः स्वेन रोचिषा ॥ किमर्थं धर्मपा
लस्य किंकरान्नो निषेधथः ॥३६॥ श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारि
णः तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥३७॥ श्रीविष्णुदूता ऊचु ॥ यूयं वै धर्मराज
स्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणं ॥३८॥ कथं स्विद्ध्रियते दं
डः किं वास्य स्थानमीप्सितं ॥ दंड्याः किं कारिणः सर्वे आहो स्वित्कतिचिन्नृणां ॥३९॥ यमदूता ऊचु ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति
शुश्रुम ॥४०॥ येन स्वधाम्न्यमी भावा रजःसत्वतमोमयाः ॥ गुणनामक्रियारूपैः विभाव्यं
ते यथातथं ॥४१॥ सूर्योग्निः खं मरुत् देवः सोमः संध्याहनी दिशः ॥ कं कुः कालो धर्म इति

भा०ष०
३
ह्येते दैह्यस्य साक्षिणः ॥४२॥ एतैरधर्मो विज्ञातः स्थानं दंडस्य युज्यते ॥ सर्वे कर्मानुरोधेन दं
डमर्हंति कारिणः ॥४३॥ संभवंति हि भद्राणि विपरीतानि चानघाः कारिणां गुणसंगोस्ति दे
हवान्न ह्यकर्मकृत् ॥४४॥ येन यावान् यथाधर्मो धर्मो वेह समीहितः ॥ स एव तत्फलं भुंक्ते
तथा तावदमुत्र वै ॥४५॥ यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते ॥ भूतेषु गुणवैचित्र्यात्
तथान्यत्रानुमीयते ॥४६॥ वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा ॥ एवं जन्मान्ययो
रेतत् धर्माधर्मनिदर्शनं ॥४७॥ मनसैव पुरे देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसतेऽपूर्वं
मनसा भगवानजः ॥४८॥ यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं न
ष्टजन्मस्मृतिस्तथा ॥४९॥ पंचभिः कुरुते स्वार्थान् पंच वेदाथ पंचभिः ॥ एकस्तु षोडशेन त्री
न्स्वयं सप्तदशोऽश्नुते ॥५०॥ तदेतत्षोडशकलं लिंगं शक्तित्रयं महत् ॥ धत्तेऽनुसंसृतिं
पुंसि हर्षशोकभयार्तिदं ॥५१॥ देह्यज्ञोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते ॥ कोशकार राम०
इवात्मानं कर्मणाच्छाद्य मुह्यति ॥५२॥ नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ का ३
र्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥५३॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्यु

त॥यथायोनियथावीजंस्वभावेनवलीयसा॥५४॥रागप्रकृतिसंगेनपुरुषस्यविपर्ययः॥आसीत्सएवन
चिरादीशसंगाद्विलीयते॥५५॥अयंहिश्रुतसंपन्नःशीलवृत्तगुणालयः॥धृतव्रतोमृदुर्दांतःसत्यवान्
मंत्रविच्छुचिः॥गुर्वग्न्यतिथिवृद्धानांशुश्रूषुर्निरहंकृतः॥सर्वभूतसुहृत्साधुर्मितवागनसूयकः॥५७॥
एकदासौवनंयातःपितृसंदेशकृद्द्विजः॥आदाययततश्चावृत्तःफलपुष्पसमित्कुशान्॥५८॥ददर्शका
मिनंकंचिच्छूद्रंसहभुजिष्यया॥पित्वाचमधुमैरेयंमदाघूर्णितनेत्रया॥५९॥मत्तयाविश्लथन्नीव्या
व्यपेतंनिरपत्रपं॥क्रीडंतमनुगायंतंहसंतमनयांतिके॥६०॥दृष्ट्वातांकामलिप्तेनबाहुनापरिरंभि
तां॥जगामहृच्छयवशंसहसैवविमोहितः॥६१॥स्तंभयन्नात्मनात्मानंयावत्सत्वंयथाश्रुतं॥नशशा
कसमाधातुंमनोमदनवेपितं॥६२॥तन्निमित्तस्मरव्याजग्रहग्रस्तोविचेतन॥तामेवमनसाध्या
यन्स्वधर्माद्विररामह॥६३॥तामेवतोषयामासपित्र्येणार्थेनयावता॥ग्राम्यैर्मनोरमैःकामैःप्रसीदेत
यथातथा॥६४॥विप्रांस्वभार्यामप्रौढांकुलेमहतिलंभितां॥विससर्जाचिरात्पापःस्वैरिण्यापांगवि
द्धधीः॥६५॥यतस्ततश्चोपनिन्येन्यायतोन्यायतोधनं॥बभारास्याःकुटुंबिन्याःकुटुंबंमंदधीरयं॥६६॥
यदसौशास्त्रमुल्लंघ्यस्वैरचार्योविगर्हितः॥अवर्त्ततचिरंकालमघायुरशुचिर्मलात्॥६७॥ततएनं

भा० ष०
४

दंडपाणेः सकाशात्कृतकिल्विषं ॥ नेष्यामो कृतनिर्वेशं यत्र दंडेन शुध्यति ॥६८॥ इति श्रीभागवते
महापुराणे षष्ठस्कंधे प्रथमोध्यायः ॥१॥ द्वितियेवैष्णवैर्याम्याज्ञामहात्म्यमद्भुतं श्रावयित्वो द्विजो
विष्णोर्लोकं नीत इतीर्यते ॥२॥ ॥श्रीशुक उवाच॥ एवं ते भगवद्दूता यमदूताभिभाषितं ॥ उपधा
र्याथ तान् राजन् प्रत्याहुर्नयकोविदाः ॥१॥ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मदृशामध
र्मस्पृशते सभां ॥ यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा ॥२॥ प्रजानां पितरो ये च शास्तारः साधवः सवै
तैते ॥४॥ यैस्यमाः ॥ यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ॥३॥ यद्यदाचरति श्रेयानितरस्तत्तदी
हते स यत्प्रमाणं कुरुते लोकस्तदनु[illegible] ॥४॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ॥
स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥५॥ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनं ॥ विश्रंभणीयो भू
तानां सघृणो दोग्धुमर्हति ॥६॥ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो ना
मस्वस्त्ययनं हरेः ॥७॥ एतेनैव ह्यघोनोस्य कृतं स्यादघनिःष्कृतं ॥ यदा नारायणायेति जगाद चतुर
क्षरं ॥८॥ स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहंता ये च पातकिनोपरे ॥ स ॥
सर्वेषामप्यघवतामिदमेव सुनिःष्कृतं ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥१०॥ न निःष्कृतै
रुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान् व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लो

ष० भा०
४

कगुणोपलंभकं ॥११॥ नैकांतिकं तद्धि कृते निःकृते ते मनः पुनर्धावति चेदसत्पथेन तत्कर्मनिर्हारमभीप्सतां
हरेर्गुणानुवादः खलु सत्वभावनः ॥१२॥ अथैनं मापनयत कृताशेषाघनिःकृतं ॥ यदसौ भगवन्नाम म्रि
यमाणसमग्रहीत् ॥१३॥ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषाघहरं वि
दुः ॥१४॥ पतितः स्खलितो भग्नः सदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनां ॥१५॥ गुरू
णि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥१६॥ तैस्तान्यघानि पूयंते तपोदानजपा
दिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥१७॥ अज्ञानादथवा ज्ञानादुत्तमश्लोकनामयत् ॥ संकी
र्तितमघं पुंसो दहेदेधो यथानलः ॥१८॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतोप्यात्मगुणं
कुर्यान्मंत्रोप्युदाहृतः ॥१९॥ श्रीशुक उवाच ॥ त एवं सुविनिर्णीतं धर्मं भागवतं नृप ॥ तं याम्यपाशान्नि
र्मुच्य विप्रं मृत्योरमूमुचन् ॥२०॥ इति प्रत्युदिता याम्या दूता यात्वा यमांतिके ॥ यमराज्ञे यथा सर्वमाचचक्षु
ररिंदम ॥२१॥ द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ विवंदे शिरसा विष्णोः किंकरान्दर्शनोत्स
वः ॥२२॥ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेऽनघ ॥२३॥ अजामि
लोप्यथाकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं ॥२४॥ भक्तिमान्भगवत्या

भा०ष०
५

ष्टुमहात्म्यश्रवणाद्धरेः॥ अनुतापोमहानासीत्स्मरतोशुभमात्मनः॥२५॥ अहोमेपरमकष्टमभूदवि
जितात्मनः॥ येनविप्लावितंब्रह्मवृषल्यांजायतात्मना॥२६॥ धिग्मांविगर्हितंसद्भिःदुःकृतंकुलक
ज्जलं॥ हित्वाबालांसतींयोहंसुरापामसतीमगां॥२७॥ वृद्धावनाथौपितरौनान्यबंधूतपस्विनौ॥ अहो
मयाधुनात्यक्तावकृतज्ञेननीचवत्॥२८॥ सोहंव्यक्तंपतिष्यामिनरकेभृशदारुणे॥ धर्मघ्नाःकामिनोय
त्रविंदंतियमयातनाः॥२९॥ किमिदंस्वप्नआहोस्वित्साक्षाद्दृष्टमिहाद्भुतं॥ क्वयाताअद्यतेयेमांव्यकर्षन्
पाशपाणय॥३०॥ अथतेक्वगताःसिद्धाश्चत्वारश्चारुदर्शना॥ व्यमोचयन्नीयमाणंस्यनोशुचेर्वृषलीपं
नंबध्वापाशैरधोभुवः॥३१॥ अथापिमेदुर्भगस्यविबुधोत्तमदर्शने॥ भवितव्यंमंगलेनयेनात्मामेप्र
सीदति॥३२॥ अन्यथाम्रियमाणस्यनाशुचेर्वृषलीपते॥ वैकुंठनामग्रहणंजिह्वावक्तुमिहार्हति॥३३॥
क्वचाहंकितवःपापोब्रह्मघ्नोनिरपत्रप॥ क्वचानारायणेत्येतत्भगवन्नाममंगलं॥३४॥ सोहंतथापति
ष्यामियतचित्तेंद्रियानिलः॥ यथानभूयआत्मानमंधेतमसिमज्जये॥३५॥ विमुच्यतमिमंबंधमविद्याका
मकर्मजं॥ सर्वभूतसुहृच्छांतोमैत्रःकरुणआत्मवान्॥३६॥ मोचयेग्रस्तमात्मानंयोषिन्मय्यात्ममायया॥
विक्रीडितोययैवाहंक्रीडामृगइवाधमः॥३७॥ ममाहमितिदेहादौहित्वामिथ्यार्थधीर्मतिंधास्येमनोभग
वतिशुद्धंतत्कीर्तनादिभिः॥३८॥ इतिजातसुनिर्वेदःक्षणसंगेनसाधुषु॥ गंगाद्वारमुपेयायमुक्तसर्वानुबं

धन॥३९॥श्रीशुक उवाच॥स तस्मिन्देवसदन आसीनो योगमाश्रितः॥प्रत्याहृतेंद्रियग्रामो युयोज मनः आ
त्मनि॥४०॥ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना॥युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि॥४१॥
यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः॥उपलभ्योपलब्धान्प्राक् ववंदे शिरसा द्विजः॥४२॥हित्वा
कलेवरं तीर्थे गंगायां दर्शनादनु॥सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां॥४३॥साकं विहायसा विप्रो
महापुरुषकिंकरैः॥हैमं विमानमारुह्य ययौ यत्र श्रियः पति॥४४॥एवं स विप्लावितसर्वधर्मा दास्याः प
तिः पतितो गर्ह्यकर्मणा॥निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवान्नाम गृह्णन्॥४५॥
नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्त्तनात्॥न यत्पुनः कर्मसु सज्जते मनो रजस्तमो
भ्यां कलिलं ततोन्यथा॥४६॥य एवं परमं गुह्यमितिहासमघापहं॥शृणुयाच्छ्रद्धया युक्तो यश्च भ
क्त्यानुकीर्तयेत्॥४७॥न वै स नरकं याति नेक्षितो यमकिंकरैः॥यद्यप्यमंगलो मर्त्यो विष्णुलोके म
हीयते॥४८॥म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं॥अजामिलोप्यगाद्धाम किं पुनः श्रद्धया गृ
णन्॥४९॥इतिश्रीभागवते महा० षष्ठस्कंधे अजामिलोपाख्याने द्वितीयः॥२॥तृतीये तु यमेनापि
विष्णुदूतैर्निरीक्षितं शास्त्वार्थं यममुखेन दृढयितुं त
...मवोत्कर्षवर्णनैः सांत्वयित्वा स्वदूतांस्ते वैष्णवैः॥
तीयाध्यायारंभः॥ ॥राजोवाच॥निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः॥

भा०ष० एवंहताज्ञोविहतान्मुरारेर्नैदेशिकैर्यस्यवशेजनोयं॥१॥यमस्यदेवस्यनदंडभंगःकुतश्चनर्षेश्रु
६ तपूर्वआसीत्॥एतन्मुनेवृश्चतिलोकसंशयंनहित्वदन्यइतिमेविनिश्चितं॥२॥श्रीशुकउवाच॥
भगवत्पुरुषैराजन्याम्याःप्रतिहतोद्यमाः॥पतिंविज्ञापयामासुर्यमंसंयमनीपतिं॥३॥यमदूता
ऊचुः॥कतिसंतीहशास्तारोजीवलोकस्यवैप्रभो॥त्रैविध्यंकुर्वतःकर्मफलाभिव्यक्तिहेतवः॥४॥य
दिस्युर्बहवोलोकेशास्तारोदंडधारिणः॥कस्यस्यातांनवाकस्यमृत्युश्चामृतमेववा॥५॥किंतुशास्तृबहु
त्वेनवहूनामिहकर्मिणांशास्तृत्वमुपचारोहियथामंडलवर्त्तिनां॥६॥अतस्त्वमेकोभूतानांसेश्वराणा
मधीश्वरः॥शास्तादंडधरोनृणांशुभाशुभविवेचनः॥७॥तस्यतेविहितोदंडोनलोकेवर्ततेधुना॥
चतुर्भिरद्भुतैःसिद्धैराज्ञातेविप्रलंभिता॥नीयमानंतवादेशादस्माभिर्यातनागृहान्॥व्यमोचयन्
पातकिनंछित्वापाशान्प्रसह्यते॥९॥तांस्तेवेदितुमिच्छामोयदिनोमन्यसेक्षमं॥नारायणेत्य
भिहितेमाभैरित्याययुर्द्रुतं॥१०॥श्रीशुकउवाच॥इतिदेवःसआपृष्टःप्रजासंयमनोयमः॥प्रीतःस्व
दूतान्प्रत्याहस्मरन्पादांबुजंहरेः॥११॥यमोवाच॥परोमदन्योजगतस्तस्थुषश्चओतंप्रोतंपटवत्
यत्रविश्वं॥यदंशतोस्यस्थितिजन्मनाशाःनस्योतवद्यस्यवशेचलोक॥१२॥योनामभिर्वाचिजनंनि राम०
जायांबध्नातितंत्र्यामिवदामभिर्गाः॥यस्मैबलिंतइमेनामकर्मभिर्निबंधबद्धाश्चकितावहंति॥१३॥ ६

भा०ष० ७

रायणेतिम्रियमाणउपैतिमुक्तिं ॥२४॥ प्रायेणवेदतदिदंनमहाजनोयंदेव्याविमोहितमतिर्वततमा
यथालं ॥ त्रय्यांजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणियुज्यमानः ॥२५॥ एवंविमृ
श्यसुधियोभगवत्यनंतेसर्वात्मनाविदधतेखलुभावयोगं ॥ तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्
तकंतदपिहंत्युरुगायवादः ॥२६॥ तेदेवसिद्धपरिगीतपवित्रगाथाः ॥ येसाधवःसमदृशोभगवत्प्रप
न्नाः ॥ तान्नोपसीदतहरेर्गदयाभिगुप्तान्नैषांवयंनचवयःप्रभवामदंडे ॥२७॥ तानानयध्वमसतोवि
मुखान्मुकुंदपादारविंदमकरंदरसादजस्रं ॥ निःकिंचनैःपरमहंसकुलैरसंगैर्जुष्टाद्गृहेनिर
यवर्त्मनिबद्धतृष्णान् ॥२८॥ जिह्वानवक्तिभगवद्गुणनामधेयंचेतश्चनस्मरतितच्चरणारविंदं ॥ कृ
ष्णायनोनमतियच्छिरएकदापितानानयध्वमसतोकृतविष्णुकृत्यान् ॥२९॥ तत्क्षम्यतांसभगवान्पु
रुषःपुराणोनारायणःस्वपुरुषैर्यदसत्कृतंनः ॥ स्वानामहोनविदुषांरचितांजलीनांक्षांतिर्गरीयसिन
मःपुरुषायभूम्ने ॥३०॥ श्रीशुकउवाच ॥ तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसां ॥ महतामपिकौरव्य
विद्ध्यैकांतिकनिःकृतिं ॥३१॥ शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः ॥ यथासुजातयाभक्त्याशुध्येन्ना
त्माव्रतादिभिः ॥३२॥ कृष्णांघ्रिपद्ममधुलिण्नपुनर्विसृष्टमायागुणेषुरमतेवृजिनावहेषु ॥ अन्यस्तुका

अहंमहेंद्रोनिऋतिःप्रचेताःसोमोग्निरीशःपवनोर्कोविरंच्यः॥आदित्यविश्वेवसवोथसाध्याःमरु
द्गणारुद्रगणाःससिद्धाः॥१४॥अन्येचयेविश्वसृजोमरेशाभृग्वादयोस्पृष्टरजस्तमस्काः॥यस्येहि
तंनविदुःस्पृष्टमायाःसत्वप्रधानाअपिकिंततोन्ये॥१५॥यंवैनगोभिर्मनसासुभिर्वाहृदागिरावासुभृ
तोविचक्षते॥आत्मानमंतर्हृदिसंतमात्मनांचक्षुर्यथैवाकृतयस्ततःपरं॥१६॥तस्यात्मतंत्रस्यहरेरधी
शितुःपरस्यमायाधिपतेर्महात्मनः॥प्रायेणदूताइहवैमनोहराश्चरंतितद्रूपगुणस्वभावाः॥१७॥भू
तानिविष्णोःसुरपूजितानिदुर्दर्शलिंगानिमहाद्भुतानि॥रक्षंतितद्भक्तिमतःपरेभ्योमत्तश्चमर्त्यानथसर्व
तश्च॥१८॥धर्मंतुसाक्षाद्भगवत्प्रणीतंनवैविदुरृषयोनापिदेवाः॥नसिद्धमुख्याअसुरामनुष्याःकु
तश्चविद्याधरचारणस्य॥१९॥स्वयंभूर्नारदःशंभुःकुमारःकपिलोमनुः॥प्रह्लादोजनकोभीष्मो
बलिर्वैयासकिर्वयं॥२०॥द्वादशैतेविजानीमोधर्मंभागवतंभटाः॥गुह्यंविशुद्धंदुर्बोधंयंज्ञात्वामृत
मश्नुते॥२१॥एतावानेवलोकेस्मिन्पुंसांधर्मपरःस्मृतः॥भक्तियोगोभगवतितन्नामग्रहणादिभिः॥२२
॥नामोच्चारणमाहात्म्यंहरेःपश्यतपुत्रकाः॥अजामिलोपियेनैवमृत्युपाशादमुच्यते॥२३॥एतावता
लमघनिर्हरणायपुंसांसंकीर्त्तनंभगवतोगुणकर्मनाम्नां॥विक्रुश्यपुत्रमघवान्यदजामिलोपिना

महतश्चात्मरजःप्रमार्ष्टुमीहेतकर्मयतएवरजःपुनःस्यात्॥३३॥इत्थंस्वभर्तृगदितंभगवन्महित्वंसंस्मृत्य
विस्मितधियोयमकिंकरास्ते॥नैवाच्युताश्रयजनंप्रतिशंकमाना॥द्रष्टुंचबिभ्यतिततःप्रभृतिस्मराज
न्॥३४॥इतिहासमिमंगुह्यंभगवान्कुंभसंभवः॥कथयामासमलयआसीनोहरिमर्चयन्॥३५॥इति
श्रीभागवतेमहापुराणेषष्ठस्कंधेतृतीयोध्यायः॥३॥चतुर्थादित्रिभिर्विश्वरूपजन्मादिवर्त्तेयाप्रचे
तःसृष्टिर्दक्षस्यवंशस्तावत्तुवर्ण्यते॥१॥चतुर्थेतुप्रजासर्गेदक्षेणाराधनंहरेः॥तपसाहंसगुह्याख्या
स्तोत्रेणचनिरूप्यते॥ ॥राजोवाच॥देवासुरनृणांसर्गोनागानांमृगपक्षिणां॥सामासिकस्त्वया
प्रोक्तोयस्तुस्वायंभुवेंतरे॥१॥तस्यैवव्यासमिच्छामिज्ञातुंतेभगवन्यथा॥अनुसर्गंयथाशक्त्याससर्ज
भगवान्परः॥२॥सूतउवाच॥इतिसंप्रश्नमाकर्ण्यराजर्षेर्बादरायणिः॥प्रतिनंद्यमहायोगीजगादमुनिस
त्तमाः॥३॥श्रीशुकोवाच॥यदाप्रचेतसःपुत्रादशप्राचीनबर्हिषः॥अंतःसमुद्रादुन्मग्नाददृशुर्गांद्रुमैर्वृतां॥
द्रुमेभ्यःक्रुध्यमानास्तेतपोदीपितमन्यवः॥मुखतोवायुमग्निंचससृजुस्तद्दिधक्षया॥५॥ताभ्यांनिर्दह्य
मानांस्तानुपलभ्यकुरूद्वह॥राजोवाचमहान्सोमोमन्युंप्रशमयन्निव॥६॥माद्रुमेभ्योमहाभागादीनेभ्यो
द्रोग्धुमर्हथ॥विवर्द्धयिषवोयूयंप्रजानांपतयःस्मृताः॥७॥अहोप्रजापतिपतिर्भगवान्हरीरिश्वरः॥वन
स्पतीनोषधीश्चससर्जोर्जमिषंविभुः॥८॥अन्नंचराणामचराह्यपादःपादचारिणां॥अहस्ताहस्तयुक्तानांद्विप

भा०ष०
९

द्रां च चतुष्पदः ॥९॥ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥
१०॥ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥११॥ तोकानां पि
तरौ बंधुर्दृशः पक्ष्म स्त्रिया पतिः ॥ पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत् ॥१२॥ अंतर्देहेषु भूतानामा
त्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥१३॥ यः समुत्पतितं देह आकाशान्म
न्युमुल्बणं ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्त्तते ॥१४॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥
वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां ॥१५॥ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा
ययौ दत्त्वा ते धर्मेणोपयेमिरे ॥१६॥ तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लो
का आपूरितास्त्रयः ॥१७॥ यथाससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहित
शृणु ॥१८॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभःस्थलजलौकसः ॥१९॥
तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विंध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥ तत्राघमर्षणं नाम
तीर्थं पापहरं परं ॥ उपस्पृश्यानुसवनं तपसा तोषयद्धरिं ॥२१॥ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजं ॥
तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥२२॥ प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुणत्रयाभा राम०
सनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे ॥२३॥ न यस्य सख्यं पुरुषो वे

वैत्तिसखुः सखावसतः पुरेतिकस्य॥ गुणोयथागुणिनोव्यक्तदृष्टेस्तस्मैमहेशायनमस्करोमि॥२४॥ देहोसवो
क्षामनवोभूतमात्रानात्मानेमन्यंचविदुःपरंयत्॥ सर्वंपुमान्वेदगुणाश्चतत्ज्ञोनवेदसर्वज्ञमनंतमी
डे॥२५॥ यदोपरामनसोनामरूपरूपस्यदृष्टस्मृतिसंप्रमोषात्॥ यईयतेकेवलयास्वसंस्थयाहंसायतस्मै
शुचिसद्मनेनमः॥२६॥ मनीषिणोंतर्हृदिसन्निवेशितंस्वशक्तिभिर्नवभिश्चत्रिवृद्भिः॥ वह्निंयथादारु
णिपांचदश्यंमनीषयानिःकर्षंतिगूढं॥२७॥ सवैममाशेषविशेषमायानिषेधनिर्वाणसुखानु
भूतिः॥ ससर्वनामासचविश्वरूपःप्रसीदतामनिरुक्तात्मशक्तिः॥२८॥ यद्यन्निरुक्तंवचसानिरूपितं
धियाक्षभिर्वामनसोतयस्य॥ माभूत्स्वरूपंगुणरूपमेवहिसवैगुणापायविसर्गलक्षणः॥२९॥ य
स्मिन्यतोयेनचयस्ययस्मैयद्योयथाकुरुतेकार्यतेच॥ परावरेषांपरमंप्राक्प्रसिद्धंतद्ब्रह्मतद्धेतुर
नन्यदेकं॥३०॥ यच्छक्तयोवदतांवादिनांवैविवादसंवादभुवोभवंति॥ कुर्वंतिचैषांमुहुरात्ममोहंतस्मै
नमोनंतगुणायभूम्ने॥३१॥ अस्तीतिनास्तीतिचवस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयो॥ अवेक्षि
तंकिंचनसांख्ययोगयोःसमंपरंह्यनुकूलंवृहतत्॥३२॥ योनुग्रहार्थंभजतांपादमूलमनामरूपोभगवा
ननंत॥ नामानिरूपाणिचजन्मकर्मभिर्भेजेसमह्यंपरमप्रसीदतु॥३३॥ यःप्राकृतैर्ज्ञानपथैर्जनानांय

भा०ष०
१९
प्रकाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतां मनोरथं ॥३४॥ श्रीशुक उवा
च ॥ इति स्तुवतः स तस्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः ॥ कृतपादः सुपर्णांसे
प्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः ॥३६॥ पीतवासा घनश्यामः प्रसन्नवद
नेक्षणः वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ॥३७॥ महाकिरीटकटकः स्फुरन्मकरकुंडलः ॥
कांच्यंगुलीकवलयनूपुरांगदभूषितः ॥३८॥ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः ॥ वृतो ना
रदनंदाद्यैः पार्षदैः सुरयूथपैः ॥३९॥ स्तूयमानोनुगायद्भिः सिद्धगंधर्वचारणैः ॥ रूपं तन्महदा
श्चर्यं विचक्ष्यागतसाध्वसः ॥४०॥ ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ न किंचनोदीरयितुम
शकत्तीव्रया मुदा ॥४१॥ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥ तं तथावनतं भक्तं प्रजाकामं प्रजा
पतिं ॥ चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥४२॥ श्रीभगवानुवाच ॥ प्राचेतस महाभाग संसि
द्धस्तपसा भवान् ॥ यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥४३॥ प्रीतोहं ते प्रजानाथ यत्तेस्योद्बृंहणं त
पः ॥ ममैष कामो भूतानां यद्भूयासुर्विभूतयः ॥४४॥ ब्रह्मा भवो भवंतश्च मनवो विबुधेश्वराः ॥ विभूत

योममहेतांमत्तानांभूतिहेतवः॥४५॥तपोमेहृदयंब्रह्मनतनुर्विद्याक्रियाकृतिः॥अंगानिःक्रतवोजा
ताःधर्मआत्मासवःसुराः॥४६॥अहमेवासमेवाग्रेनान्यत्किंचांतरंवहिः॥संज्ञानमात्रमव्यक्तंप्रसुप्त
मिवविश्वतः॥४७॥मय्यनंतगुणेनंतेगुणतोगुणविग्रहः॥यदासीत्ततएवाद्यःस्वयंभूःसमभूदजः॥४८॥
सवैयदामहादेवोममवीर्योपबृंहितः॥मेनेखिलमिवात्मानमुद्यतःसर्गकर्मणि॥४९॥अथमेभिहि
तोदेवःतपोतप्यतदारुणं॥नवविश्वसृजोयुष्मान्येनादावसृजद्विभुः॥५०॥एषापंचजनस्यांगदुहि
तावैप्रजापतेः॥असिक्नीनामपत्नीत्वेप्रजेशप्रतिगृह्यतां॥५१॥मिथुनव्यवायधर्मस्त्वंप्रजासर्गमिमंपुनः॥
मिथुनव्यवायधर्मिण्यांभूरिशोभावयिष्यसि॥५२॥त्वत्तोधस्तात्प्रजाःसर्वाःमिथुनीभूयमायया॥मदी
ययाभविष्यंतिहरिष्यंतिचमेवलिं॥५३॥श्रीशुकोवाच॥इत्युक्त्वामिषतस्तस्यभगवान्विश्वभावनः॥स्व
प्नोपलब्धार्थइवतत्रैवांतर्दधेहरिः॥५४॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेचतुर्थोध्यायः॥४॥पंच
मेनारदेनाथवाचःक्रूरैस्तुनाशितान्सुतानांकल्पेदक्षोमुंशशापेतिनिरूप्यते॥१॥ ॥श्रीशुकोवा
च॥तस्यांसपांचजन्यांवैविष्णुमायोपबृंहितः॥हर्यश्वसंज्ञानयुतंपुत्रानजनयद्विभुः॥१॥अपृथग्धर्म
शीलास्तेसर्वेदाक्षायणानृप॥पित्राप्रोक्ताःप्रजासर्गेप्रतीचींप्रययुर्दिशं॥२॥तत्रनारायणसरस्ती

भा०ष०
११

पसिंधुसमुद्रयो॥ संगमो यत्र सुमहत्सुनिसिद्धनिषेवितं॥३॥ तदुपस्पर्शनादेव विनिर्धूतमलाशया॥
धर्मे पारमहंस्ये च प्रोत्पन्नमतयोप्युत॥४॥ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः॥ प्रजाविवृद्धये यत्ता
न् देवर्षिस्तान् ददर्श ह॥५॥ उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः॥ अदृष्ट्वांतं भुवो यूयं बालिशा
बत पालकाः॥६॥ तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं बहु॥ रूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं
॥७॥ नदीमुभयतो वाहां पंचपंचाद्भुतं गृहं॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि॥८॥ कथं स्वपि
तुरादेशमविद्वांसो विपश्चित॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ॥९॥ श्रीशुक उवाच॥ तन्नि
शम्याथ हर्यश्वा औत्पत्तिकमनीषया॥ वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया॥१०॥ भूः क्षेत्रं जीवसं
ज्ञं यदनादि निजबंधनं॥ अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत्॥११॥ एक एवेश्वरस्तुर्यो भग
वान् स्वाश्रयः परः॥ तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत्॥१२॥ पुमान्नैवैति यद्गत्वा बिलस्वर्गं गतो
यथा॥ प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत्॥१३॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता॥
तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत्॥१४॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत्॥ तद्गतीरबु
धस्येह किमसत्कर्मभिर्भवेत् ॥१५॥ सृष्ट्यप्ययकरीं मायां वेलाकूलांतवेगिनीं॥ मत्तस्य तदविज्ञ १०

स्वःकिमसत्कर्मभिर्भवेत्॥१६॥पंचविंशतितत्वानांपुरुषोद्भुतदर्पणं॥अध्यात्ममबुधस्येह
किमसत्कर्मभिर्भवेत्॥१७॥ऐश्वरंशास्त्रमुत्सृज्यबंधमोक्षानुदर्शनं॥विविक्तपदमज्ञाय
किमसत्कर्मभिर्भवेत्॥१८॥कालचक्रंभ्रमितीक्ष्णंसर्वंनिष्कर्षयज्जगत्॥स्वतंत्रमबुधस्ये
हकिमसत्कर्मभिर्भवेत्॥१९॥शास्त्रस्यपितुरादेशंयोनवेदनिवर्तकं॥कथंतदनुरूपायगु
णविश्रंभ्युपक्रमेत्॥२०॥इतिव्यवसिताराजन्हर्यश्वाएकचेतसः॥प्रययुस्तंपरिक्रम्यपंथा
नमनिवर्तनं॥२१॥स्वरब्रह्मणिनिर्भातहृषीकेशपदांबुजे॥अखंडंचित्तमावेश्यलोकाननु
चरन्मुनि॥२२॥नाशंनिशम्यपुत्राणांनारदाच्छीलशालिनां॥अन्वतप्यतकःशोचन्सुप्रज
स्त्वंशुचांपदं॥२३॥सभूयःपांचजन्यायामजेनपरिसांत्वितः॥पुत्रानजनयद्दक्षसवलाश्वा
न्सहस्रिशः॥२४॥तेपिपित्रासमादिष्टाःप्रजासर्गेधृतव्रताः॥नारायणसरोजग्मुःयत्रसिद्धाःस्व
पूर्वजाः॥२५॥तदुपस्पर्शनादेवविनिर्धूतमलाशयाः॥जपंतोब्रह्मपरमंतेपुस्तत्रमहत्तपः॥२६॥
अब्भक्षाःकतिचिन्मासान्कतिचिद्वायुभोजनाः॥आराधयन्मंत्रमिमभ्यसंतइडस्पतिं॥२७॥ॐ

नमो नारायणाय पुरुषाय महात्मने विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि ॥२८॥ इति तानपि राजेंद्र प्र
तिसर्गधियो मुनिः ॥ उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् ॥२९॥ दाक्षायणाः संशृणुत गदतो नि
गमं मम ॥ अन्विच्छतानुपदवीं भ्रातृणां भ्रातृवत्सलाः ॥३०॥ भ्रातृणां प्रायणं भ्राता यो नुतिष्ठति धर्म
वित् ॥ स पुण्यबंधुः पुरुषो मरुद्भिः सह मोदते ॥३१॥ एतावदुक्त्वा प्रययौ नारदो मोघदर्शनः ॥ ते
पि चान्वगमन्मार्गं भ्रातृणामेव मारिष ॥३२॥ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ॥ नाद्यापि
ते निवर्तंते पश्चिमा यामिनीरिव ॥३३॥ एतस्मिन्काल उत्पातान् बहून्पश्यन्प्रजापतिः ॥ पूर्व
वन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥३४॥ चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ॥ देवर्षि
मुपलभ्याह रोषाद्विस्फुरिताधरः ॥३५॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन नस्त्वया ॥
असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥३६॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्म
णां ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥३७॥ एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ॥
पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥३८॥ ननु भागवता नित्यं भूतानुग्रहकातराः ॥ ऋते त्वां
सौहृदघ्नं वै वैरंकरमवैरिणां ॥३९॥ नेत्थं पुंसां विरागः स्यात् त्वया केवलिना मृषा ॥ मन्यसे

यद्युपशमं स्नेहपाशनिकृंतनं ॥४०॥ नानुभूय न जानंति पुमान्विषयतीक्ष्णतां ॥ निर्विद्येत
स्वयंतस्मात् न तथा भिन्नधीः परैः ॥४१॥ यन्नस्त्वं कर्मबंधानां साधूनां गृहमेधिनां ॥ कृत
वानसि दुर्मर्षं विप्रियं तव मर्षितं ॥४२॥ तंतुकृंतन यन्नस्त्वमभद्रमचरः पुनः ॥ तस्माल्लो
केषु ते मूढ न भवेद्भ्रमतः पदं ॥४३॥ श्रीशुक उवाच ॥ प्रतिजग्राह तद्बाढं नारदः साधुसंम
तः ॥ एतावान्साधुवादो हि तितिक्षेतेश्वरः स्वयं ॥४४॥ इति श्रीभागवते षष्ठस्कंधे दक्ष
नारदसंवादे पंचमोऽध्यायः ॥५॥ षष्ठे दक्षेण सृष्टायां कन्याषष्ट्यां प्रकीर्तिताः ॥ यस्य वंश्या
यतो जातो विश्वरूपादिते पुमान् ॥१॥ ॥श्रीशुक उवाच॥ ततः प्राचेतसोऽसिक्न्यामनुनीतः
स्वयंभुवा ॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥१॥ दश धर्म त्रिनवेंदोः कश्यपाय त्रयो
दश ॥ भूतांगिरसः कृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः ॥२॥ नामधेयान्यमूषां त्वं सापत्यानां च मे
शृणु ॥ यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥३॥ भानुर्लंबा ककुद्यामिर्विश्वा साध्या
मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान्शृणु ॥४॥ भानोस्तु देवऋषभ इंद्रसेन

भा० ब्र० स्तेतौन्त्प॥ विघोत आसीत्तं वाया स्तत अस्तन यित्नवः॥५॥ केकुभः केदकस्तस्य कीकरस्तन
१२ योपतः॥ भसेदुर्गाणि जामेयः स्वर्गो नंदिस्तनो भवेत्॥६॥ विश्वेदेवास्तु विश्वायाः अप्रजां
स्तान्प्रचक्षते॥ साध्योगुणस्तु साध्याया अर्थसिद्धिस्तत सुतः॥७॥ मरुत्वां अजयंत अमरुत्वत्यां
अभूवतु॥ जयंतो वासुदेवांशः उपेंद्र इति यं विदुः॥८॥ मौहूर्तिका देवगणाः मुहूर्तीया अज
ज्ञिरे॥ येवै फलं प्रयच्छंति भूतानां स्वस्वकालजं॥९॥ संकल्पायाश्च संकल्पः कामः संकल्पजः
स्मृतः॥ वसवोष्टौ वसोः पुत्रास्तेषां नामानिमे शृणु॥१०॥ द्रोणः प्राणो ध्रुवो र्कोग्निर्दोषो वसु
र्विभावसुः॥ द्रोणस्याभिमते पत्न्या हर्षशोकभयादयः॥११॥ प्राणस्योर्जस्वती भार्या सह आयुः
पुरोजवः॥ ध्रुवस्य भार्या धरणिरसूत विविधापुरः॥१२॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः
स्मृताः॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः॥१३॥ स्कंदश्च कृत्तिका पुत्रो ग्नेर्विशाखादा
यस्ततः॥ दोषस्य शर्वरी पुत्रः शिशुमारो हरेः कला॥१४॥ वंसोरांगिरसी पुत्रो विश्वकर्माकृतीपतिः॥
ततो मनुश्चाक्षुको भूद्विश्वे साध्या मनोः सुताः॥१५॥ विभावसोरसूमोषा व्युष्टं रोचिषमातपं॥ पंचया राम०
९२

मोथभूतानियेनजायंति कर्मसु ॥१६॥ सरूपासूतभूतस्य भार्यारुद्रांश्चकोटिशः ॥ रैवतोऽ
जोभवोभीमो वाम उग्रो वृषाकपिः ॥१७॥ अजैकपादहिर्बुध्नोवहुरूपोमहानिति ॥ रुद्रस्य
पार्षदाश्चान्येघोराभूतविनायकाः ॥१८॥ प्रजापतेरंगिरसः स्वधापत्नीपितृन्नथ ॥ अ
थर्वांगिरसंवेदंपुत्रत्वेचाकरोत्सती ॥१९॥ कृशाश्वोर्चिषिभार्यायांधूम्रकेशमजीजन
त् ॥ धिषणायांवेदशिरोदेवलंवयुनंमनुं ॥२०॥ तार्क्ष्यस्य विनताकद्रूः पतंगीयामिनी
इति ॥ पतंग्यसूतपतगान्यामिनीशलभानथ ॥२१॥ सुपर्णासूतगरुडंतासाक्षाद्यज्ञेश
वाहनं ॥ सूर्यसूतमनूरुंचकद्रूर्नागाननेकशः ॥२२॥ कृत्तिकादीनिनक्षत्राणीन्दोःपत्न्य
स्तुभारत ॥ दक्षशापात्सोनपत्यस्तासुयक्ष्मग्रहार्दितः ॥२३॥ पुनःप्रसाद्यतंसोमःका
लाभेक्षयेर्दिताः ॥ शृणुनामानिलोकानांमातॄणांशंकराणिच ॥ अथकश्यपपत्नी
नांयत्प्रसूतमिदंजगत् ॥२४॥ अदितिर्दितिर्दनुःकाष्ठाअरिष्टासुरसाइला ॥ मुनिः
क्रोधवशाताम्रासुरभिःसरमातिमिः ॥२५॥ तिमेर्यादोगणाआसन्श्वापदाःसुरसा

भा०ष० सुताः॥ सुरभेर्महिषीगावो ये चान्ये द्विशफान्नृपः॥२६॥ ताम्रायाः श्येनगृध्राद्याः मुनेरप्सरसां
१२ गणाः॥ दंदशूकादयः सर्पा राजन्क्रोधवशात्मजाः॥२७॥ इलायां भूरुहाः सर्वे यातुधानाश्च
सौरसाः॥ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः॥२८॥ सुता दनोरेकषष्टिस्तेषां प्रा
धानिकान्शृणु॥ द्विमूर्द्धा शंबरोरिष्टो हयग्रीवो विभावसुः॥२९॥ अयोमुखः शंकुशिराः
स्वर्भानुः कपिलोरुणः॥ पुलोमा वृषपर्वा च एकचक्रोनुतापनः॥३०॥ धूम्रकेशो विरूपाक्षो
विप्रचित्तिश्च दुर्जयः॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल॥३१॥ वृषपर्वणी मैष्ठां
ययातिर्नहुषो बली वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः॥३२॥ उपदानवी हयशिरा
पुलोमा कालिका तथा॥ उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृपः॥३३॥ पुलोमां कालि
कां चैव वैश्वानरसुते तु कः॥ उपयेमेथ भगवान् कश्यपो ब्रह्मचोदिताः॥३४॥ पौलोमाः का
लिकेयाश्च दानवा युद्धशालिनः॥ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता॥३५॥ जघा राम०
न स्वर्गतो राजन्नेक इंद्रप्रियंकरः॥ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत राहु १३

ज्येष्टं केतुशतंग्रहत्वंयः उपागता॥ अथातः श्रूयतां वंशोयोदितेरनुपूर्वशः॥ यत्रनारायणोदेवः स्वांशे
नावतरद्विभुः॥ विवस्वानर्यमापूषा त्वष्टाथसविताभग॥३८॥ धातोविधाता वरुणोमित्रः शक्रउ
रुक्रमः॥ विवस्वतश्राद्धदेवं संज्ञासूयतवैमनुः॥३९॥ मिथुनंचमहाभागायमंदेवंयमीतथा॥ सैव
भूत्वाथवडवानासत्यौसुषुवेभुवि॥४०॥ छायाशनैश्चरंलेभेसावर्णिंचमनुततः॥ कन्यांचतप
तीयावैववेसंवरणंपति॥४१॥ अर्यम्णोमातृकापत्नीतयोश्चर्षणयः सुतः॥ यत्रवैमानुषीजाति
र्ब्रह्मणाचोपकल्पिता॥४२॥ पूषानपत्यः पिष्टादोभग्नदंतोभवत्पुरा॥ योसौदक्षायकुपितंज
हासविवृतद्विजः॥४३॥ त्वष्टुर्दैत्यात्मजाभार्यारचनानामकन्यकासन्निवेशस्तयोर्जज्ञेविश्वरू
पश्चवीर्यवान्॥४४॥ तंवव्रिरेसुरगणादौहित्रंद्विषतामपि॥ विमतेनपरित्यक्तागुरुणांगिरसेन
यत्॥४५॥ इति श्रीभागवतेमहापुराणेषष्टस्कंधेषष्टोध्यायः॥६॥ सप्तमेविश्वरूपोसौपुरोहित
व्रतः सुरः॥ गुरुणांसंपरित्यक्तैः पौरोहित्यमथाकरोत्॥१॥ ॥ राजोवाच॥ यस्यहेतोपरित्यक्ता आचा
र्येणात्मनसुराः॥ एतदाचक्ष्वभगवन्शिष्याणामक्रमंगुरौ॥१॥ श्रीशुकोवाच॥ इंद्रः त्रिभुवनैश्व
र्यमदोलंघितसत्पथः॥ मरुद्भिर्वसुभीरुद्रैरादित्यैरृभुभिर्नृप॥२॥ विश्वेदेवैश्चसाध्यैश्चनासत्या

भा०ष०

१४

यांपरिश्रितः॥सिद्धचारणगांधर्वैर्मुनिभिर्ब्रह्मवादिभिः॥३॥विद्याधराप्सरोभिश्च किंनरैः पत
गोरगैः॥निषेव्यमाणो भगवान् स्तूयमानश्च भारत॥४॥उपगीयमानो ललितमास्थानाध्या
सनाश्रितः॥पांडुरेणातपत्रेण चंद्रमंडलचारुणा॥५॥युतश्चान्यैः परमेष्ठ्यैश्चामरव्यजनादि
भिः॥विराजमानः पौलोम्या सहार्द्धासनया भृसं॥६॥स यदा परमाचार्यं देवानामात्मनश्च ह॥
नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः॥७॥वाचापतिं मुनिवरं सुरासुरनमस्कृतं॥नोच्चचा
लासनादिंद्रः पश्यन्नपि सभागतं॥८॥ततो निर्गत्य सहसा कविरांगिरसः प्रभुः॥आययौ स्व
गृहं तूष्णीं विद्वान् श्रीमदविक्रियं॥९॥तर्ह्येव प्रतिबुध्येंद्रो गुरुहेलनमात्मनः॥गर्हयामास
सदसि स्वयमात्मानमात्मना॥१०॥अहो बत मयासाधु कृतं वै दभ्रबुद्धिना॥यन्मयैश्वर्यम
त्तेन गुरुः सदसि भारत॥११॥को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि॥ययाहमासुरं भा
वं नीतोद्य विबुधेश्वरः॥१२॥ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन॥प्रत्युत्तिष्ठेदिति ब्रू
युर्धर्मं ते न परं विदुः॥१३॥तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः॥ये श्रद्दध्युर्वचस्ते वै म रा०म०
घोनो भगवान् गृहात्॥बृहस्पतिर्गतो दृष्टां गतिमध्यात्ममायया॥१४॥गुरोर्नाधिगतः संज्ञां १४

परीक्षन् भगवान् स्वराट् ॥ ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥१७॥ तत् श्रुत्वैवासुराः सर्वे
आश्रुत्यौशनसं मतं ॥ देवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥१८॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नां
गोरुबाहवः ॥ ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकंधराः ॥१९॥ तांस्तथाभ्यर्दितान्वीक्ष्य भगवाना
त्मभूरजः ॥ कृपया परया देव उवाच परिसांत्वयन् ॥२०॥ ब्रह्मोवाच ॥ अहो बत सुरश्रेष्ठा ह्यभद्रं
वः कृतं महत् ॥ ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत ॥२१॥ तस्यायमनयस्यासीत्परेभ्यो वः पराभ
वः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ॥२२॥ मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वतिक्र
मात् संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः ॥ आददीरन् निलयनं ममापि भृगुदेवताः ॥
२३ त्रिविष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः ॥ न विप्रगोविंदगवीश्वराणां भ
वंत्यभद्राणि नरेश्वराणां ॥२४॥ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतं ॥ सभा
जितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥२५॥ श्रीशुक उवाच ॥ त एवमुदिता रा
जन् ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥२६॥ देवा ऊचुः ॥ वयं तेऽति

भा०ष० पयः प्रणताः आश्रमं नृदमस्त्रते ॥ कामः संपद्यतां तात पितॄणां सम चिताः ॥२७॥ पुत्राणां हि परो धर्मः पि
२५ तृशुश्रूषणं सतां ॥ अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणां ॥२८॥ आचार्यो ब्रह्मणो मूर्त्तिः प्रजाप
तेः [illegible] मत्स तेर्मूर्त्तिर्माता साक्षात् क्षितेस्तनु ॥२९॥ दयाया भगिनी मूर्त्तिः धर्मस्यात्मातिथिः स्वयं ॥
अग्नेरभ्यागतो मूर्त्तिः सर्वभूतानि चात्मनः ॥३०॥ तस्मात् पितॄणामार्त्तानामार्त्तिं परपराभवं ॥ तपसाप
नयंस्तात संदेशं कर्त्तुमर्हसि ॥३१॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुं ॥ यथांजसा विजेष्या
मः सपत्नांस्तव तेजसा ॥३२॥ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनं ॥ छंदोभ्योऽन्यत्र न ब्रह्मन् वयो
ज्येष्ठस्य कारणं ॥३३॥ ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ॥ स विश्वरूपस्तानाह
प्रसन्न श्लक्ष्णया गिरा ॥३४॥ विश्वरूपोवाच ॥ विगर्हितं धर्मशीलैः ब्रह्मवर्च उपव्ययं ॥ कथं नु मद्वि
धो नाथा लोकेशैरभियाचितं ॥ प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥३५॥ अकिंचनानां
हि धनं शिलोंछनं तेनेह निर्वर्त्तितसाधुसत्क्रियः ॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्य
ति येन दुर्मतिः ॥३६॥ तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च सा
धये ॥३७॥ श्रीशुकोवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ॥ पौरोहित्यं वृतश्चक्रे परमेण समा राम०
धिना ॥३८॥ सुरद्विषां श्रियं गुप्तां मौशनस्यापि विद्यया ॥ आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया वि २५

भुः॥३९॥ यथागुप्तः सहस्राक्षो जिग्येसुरचमूर्विभुः॥ तंप्राह समहेंद्राय विश्वरूप उदारधी॥४०॥
इति श्रीभागवते महापुराणे षष्ठस्कंधे सप्तमोध्यायः॥७॥ अष्टमे विश्वरूपस्क वर्म नारायणा
त्मकं॥ इंद्राय प्राह येनेंद्रो गुप्तो दैत्यानथाजयत्॥१॥ ॥राजोवाच॥ यथा गुप्त सहस्राक्षः सवा
हान् रिपुसैनिकान्॥ क्रीडन्निव विनिर्जित्य त्रैलोक्यां बुभुजे श्रियं॥१॥ भगवंस्तन्ममाख्याहि व
र्म नारायणात्मकं॥ यथाततायिनः शत्रून् येन गुप्तोजयन्मृधे॥२॥ श्रीशुकोवाच॥ वृतः पुरो
हितस्त्वाष्ट्रो महेंद्रायानुपृच्छते॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु॥३॥ विश्वरू
पोवाच॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शु
चिः॥ नारायणपरं वर्म संनह्येद्भय आगते॥४॥ दैवभूतात्मकर्मेभ्यो नारायणमयः पुमान्॥ पा
दयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत्॥५॥ ॐ
नमो नारायणायेति विपर्ययमथापि वा॥ करन्यासं ततः कुर्यात् द्वादशाक्षरविद्यया॥६॥ प्रणवा
दियकारांतमंगुल्यंगुष्ठपर्वसु॥ न्यसेत् हृदय ओंकारं विकारमनु मूर्द्धनि॥७॥ षकारं तु भ्रु

भा०ष०
वामेध्रीएं कारं शिषयादिशेत् ॥ यकारं नेत्रयोर्युंज्यात्‌नकारं सर्वसंधिषु ॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्त्तिर्भवे
२६ द्बुधः ॥ सविसर्गं फडंतं तु सर्वदिक्षु विनिर्द्दिशेत् ॥ ९ ॥ ॐ विष्णवे नमइति ॥ आत्मानं परमं ध्यायेत् ध्येयं षट्शक्ति
भिर्युतं ॥ विद्यातेजस्तपोमूर्त्तिमिमं मंत्रमुदाहरेत् ॥ १० ॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्र
पृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान्दधानोष्टगुणोष्टबाहुः ॥ ११ ॥ जलेषु मां रक्षतु मत्स्यमूर्त्तिर्यादोगणेभ्यो
वरुणस्य पाशात् ॥ स्थलेषु मायाबटुवामनो व्यात्त्रिविक्रमः खेवतु विश्वरूपः ॥ १२ ॥ दुर्गेष्वटव्याजिमुखादि
षु प्रभुः पायान्नृसिंहोसुरयूथपारिः ॥ विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १३ ॥ रक्षत्व
सौमाध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोद्रिकूटेष्वथ विप्रवासे सलक्ष्मणो व्याद्भरताग्रजोस्मा
न् ॥ १४ ॥ मामुग्रधर्मादखिलात्प्रमादात् नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पाया
द्गुणेशः कपिलः कर्मबंधात् ॥ १५ ॥ सनत्कुमारोवतु कामदेवात् हयशीर्षा मां पथि देवहेलनात् ॥ देवर्षि
वर्यः पुरुषार्चनांतरात् कूर्मो हरिर्मां निरयादशेषात् ॥ १६ ॥ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृष रा.म०
भो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनांतात् बलो गणात्क्रोधवशादहींद्रः ॥ १७ ॥ द्वैपायनो भगवानप्र १६

बोधात् बुद्धस्तु पाषंडगणात्प्रमादात्॥ कल्किः कलेः कालमलात्प्रयातु धर्मावनायोरुकृतावतारः॥१८॥ मां केश
वो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः॥ नारायणः प्रातरुदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः॥१९॥ देवोप
राह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां॥ दोषे हृषीकेश उतार्द्धरात्रे निशीथ एकोवतु पद्मनाभः॥२०॥
श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोसिधरो जनार्दनः॥ दामोदरोव्यादनुसंध्यं प्रभाते विश्वेश्वरो भग
वान् कालमूर्तिः॥२१॥ चक्रं युगांतानलतिग्मनेमिभ्रमत्समंताद्भगवत्प्रयुक्तं॥ दंदग्धि दंदग्ध्यरिसैन्यमा
शु कक्षं यथा वायुयुतो हुताशः॥२२॥ गदेशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि॥ कू
ष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन्॥२३॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्र
ग्रहघोरदृष्टीन्॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोरेर्हृदयानि कंपयन्॥२४॥ त्वं तिग्मधारासिवरारि
सैन्यमीश प्रयुक्तो मम छिंधि छिंधि॥ चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघोनां हर पापचक्षुषां॥२५॥
यन्नो भयं ग्रहेभ्यो भूत् केतुभ्यो नृभ्य एव च॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंहोभ्य एव च॥२६॥ सर्वाण्ये
तानि भगवन्नामरूपास्त्रकीर्तनात्॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः॥२७॥ गरुडो भगवान् स्तो
त्रस्तोभश्छंदोमयः प्रभुः॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः॥२८॥ सर्वापद्भ्यो हरेर्नामरूपया

ना०व० नायुधानि नः॥ बुद्धीन्द्रियमनःप्राणान्पांतुपार्षदभूषणाः॥२९॥ यथा हि भगवानेववस्तुतःसदसच्चयत्॥
४७ सत्येनानेन नःसर्वे यांतु नाशमुपद्रवाः॥३०॥ यथैकात्म्यानुभावानांविकल्परहितःस्वयं॥ भूषणायुधलिंगा
ख्याधत्तेशक्तीःस्वमायया॥३१॥ तेनैवसत्यमानेनसर्वज्ञोभगवान्हरिः॥ पातुसर्वैःस्वरूपैर्नःसदासर्व
त्रसर्वगः॥३२॥ विदिक्षुदिक्षूर्द्धमधःसमंतदंतर्बहिर्भगवान्नारसिंहः॥ प्रहापयल्लोकभयंस्वनेनस्वतेज
साग्रस्ततेजाः॥३३॥ मघवन्निदमाख्यातंवर्मनारायणात्मकं॥ विजेष्यसेंजसायेनदंशितोसुरयू
थपान्॥३४॥ एतद्धारयमाणस्तुयंयंपश्यतिचक्षुषा॥ पदावासंस्पृशेत्सद्यःसाध्वसात्सविमुच्यते॥
३५॥ नकुतश्चिद्भयंतस्यविद्यांधारयतोभवेत्॥ राजदस्युग्रहादिभ्योव्याघ्रादिभ्यश्चकर्हिचित्॥
३६॥ इमांविद्यांपुराकश्चित्कौशिकोधारयन्द्विजः॥ योगधारणयास्वांगंजहौसमरुधन्वनि॥
३७॥ तस्योपरिविमानेनगंधर्वपतिरेकदा॥ ययौचित्ररथःस्त्रीभिर्वृतोयत्रद्विजक्षयः॥३८॥ गगनान्न्य
पतत्सद्यःसविमानोह्यवाक्शिराः॥ विद्यामिमांधारयतोम्नतस्यास्थितिलंघनात्॥ सवालखिल्यवचनाद राम०
१७

स्थौ नारायविस्मितः ॥३९॥ प्राच्यप्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ श्रीशुक उवाच ॥ य इदं शृणुयात्का
ले यो धारयति चादृतः ॥४०॥ सूतो वाच ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे वि
निर्जित्य मृधेऽसुरान् ॥४१॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे नारायणवर्मनामाष्टमोध्यायः ॥८॥ नवमे विश्व
रूपस्तु हतेः शक्रेण कोपतः ॥ त्वष्टुश्चोत्पादितो वृत्रो भीतिर्देवै हरेः स्तुतिः ॥ सोमस्य पीथं पानं यस्मिन् एवं सुरापीथं
अन्नमतीत्यन्नादं अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीदित्यादिश्रुतिरनुसंधेया ॥१॥ ॥ श्रीशुक
उवाच ॥ तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥१॥ स
वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ॥२॥ स एव हि ददौ भागं प
रोक्षमसुरान् प्रति ॥ यजमानोवहद्भागं मातृस्नेहवशानुगः ॥३॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः ॥ आ
लक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥४॥ सोमपीथं तु यत्तस्य शिर आसीत्कपिंजलः ॥ कलविंकः सुरा
पीथमन्नादं यस्स तित्तिरिः ॥५॥ ब्रह्महत्यामंजलिना जग्राह यदपीश्वरः ॥ संवत्सरांते तदघं भूतानां स विशु
द्धये ॥६॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ भूमिस्तुरीयं जग्राह खातपूरवरेण वै ॥७॥ ईरिणं

ध

श्री० ष० ब्रह्महत्यायारूपंभूमौप्रदृश्यते॥ तुर्यंछेदविरोहेणवरेणजगृहुर्द्रुमाः॥ तेषांनिर्यासरूपेणब्रह्महत्याप्रच
१९ क्षते॥८॥ शश्वत्कामवरेणांहः तुरीयंजगृहुःस्त्रियः॥ रजोरूपेणतास्वंहीमासिमासिप्रदृश्यते॥९॥ द
शीभूयोवरेणापस्तुरीयंजगृहुर्मलं॥ तासुबुद्बुदफेनाभ्यांदृष्टंतद्धरतिक्षिपन्॥१०॥ हतपुत्रस्ततस्त्वष्टा
जुहावेंद्रायशत्रवे॥ इंद्रशत्रोविवर्द्धस्वमाचिरंजहिविद्विषं॥११॥ अथान्वाहार्यपचनादुत्थितोघो
रदर्शनः॥ कृतान्तइवलोकानांयुगान्तसमयेयथा॥१२॥ विष्वग्विवर्द्धमानंतमिषुमात्रंदिनेदिने॥ दग्ध
शैलप्रतीकाशंसंध्याभ्रानीकवर्चसं॥१३॥ तप्तताम्रशिखाश्मश्रुमध्याह्नार्कोग्रलोचनं॥१४॥ दीप्यमा
नेत्रिशिखेशूलश्चारोप्यरोदसी॥१४॥ नृत्यंतमुन्नदंतंचचालयंतंपदान्महीं॥ दरीगंभीरवक्त्रेणपिबना
चनभस्तलं॥१५॥ लिहताजिह्वयाज्वालिग्रसताभुवनत्रयं॥ महतारौद्रदंष्ट्रेणजृंभमाणमुहुर्मुहुः॥
वित्रस्तादुद्रुवुर्लोकावीक्ष्यसर्वेदिशोदस॥१७॥ येनावृताइमेलोकाःतपतात्वाष्ट्रमूर्त्तिना॥ सर्वेवृत्रइति
प्रोक्तःपापःपरमदारुणः॥१८॥ तंनिजघ्नुरभिद्रुत्यसगणाविबुधर्षभाः॥ स्वैःस्वैर्दिव्यास्त्रशस्त्रौघैःसो राम०
ग्रसत्तानिकृत्स्नशः॥१९॥ ततस्तेविस्मिताःसर्वेविषण्णाग्रस्ततेजसः॥ प्रत्यंचमादिपुरुषमुपतस्थुःसमा १९

वैप्रायसाश्रमवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः ॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ताः परुषरूक्षवा
भा० ष० २२ च ॥२८॥ ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते द
धुरात्तसाराः ॥२९॥ वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् पलायितं प्रेक्ष्य बलं च भग्नं भये
न तीव्रेण विहस्य वीरः ॥३०॥ कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ॥ हे विप्रचित्ते नमुचे पु
लोमन् मयानर्वन् छंबर मे शृणुध्वं ॥३१॥ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया तस्य न चेह क्लृप्ता ॥ लोके
यशः स्वाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तं ॥३२॥ द्वौ सम्मताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया
याजितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्त ॥३३॥ इति श्रीभागवते महापुराणे ष
ष्ठस्कंधे दशमोऽध्यायः ॥१०॥ राकादशे वृत्रतस्य युध्यमानस्य वज्रिणा ॥ भक्तिमान बलोदर्को श्रित्रावाचो
नुवर्णिताः ॥१॥ ॥ श्रीशुक उवाच ॥ त एवं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृह्णन्भयत्रस्ताः पला
यनपरा नृप ॥१॥ विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथव रा म०
त् ॥२॥ दृष्ट्वातप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः ॥ तान्निवार्योजसा राजन् निर्भर्त्स्येदमुवाच ह ॥३॥ किं व उच्चरितैर्मा २२
तुः धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ॥४॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका

भा०प
१९

तः॥स्तूयमानोमुनिगणैर्देवैर्लोकंहर्षयन्निव॥१४॥वृत्रमभ्यद्रवच्छत्रुमसुरानीकयूथपैः॥पर्यस्तमोजसारा
जन्क्रुद्धोरुद्रइवांतकं॥१५॥ततःसुराणामसुरैःरणःपरमदारुणः॥त्रेतामुखेनर्मदायामभवत्प्रथमेयुगे॥
१६॥रुद्रैर्वसुभिरादित्यैरश्विभ्यांपितृवह्निभिः॥मरुद्भिरृभुभिःसाध्यैर्विश्वेदेवैर्मरुत्पतिं॥१७॥दृष्ट्वा
वज्रधरंशक्रंरोचमानंस्वयाश्रिया॥नामृष्यन्नसुराराजन्मृधेवृत्रपुरःसराः॥१८॥नमुचिःशंबरोन
र्वान्द्विमूर्द्धर्षभोंऽबराः॥हयग्रीवःशंकुशिराःविप्रचित्तिरयोमुखः॥१९॥पुलोमावृषपर्वाचप्रहे
तिर्हेतिरुत्कलः॥दैतेयादानवायक्षारक्षांसिचसहस्रशः॥२०॥सुमालिमालिप्रमुखाःकार्तस्वरपरिच्छ
दाः॥प्रतिषिध्येंद्रसेनाग्रंमृत्योरपिदुरासदाः॥२१॥अभ्यर्दयन्नसंभ्रांताःसिंहनादेनदुर्मदाः॥गदाभिःप
रिघैर्बाणैःप्रासमुद्गरतोमरैः॥२२॥शूलैःपरश्वधैःखड्गैःशतघ्नीभिःभुशुंडिभिः॥सर्वतोवाकिरंछस्त्रैर
स्त्रैश्चविबुधर्षभान्॥२३॥नतेदृश्यंतसंछन्नाःशरजालैःसमंततः॥पुंखानुपुंखपतितैर्ज्योतींषीवनभो
घनैः॥२४॥नतेशस्त्रास्त्रवर्षौघाह्यासेदुःसुरसैनिकान्॥छिन्नाःसिद्धपथेदेवैर्लघुहस्तैःसहस्रधा॥२५॥
अथक्षीणास्त्रशस्त्रौघागिरिशृंगद्रुमेर्दृषद्भिर्विविधाद्रिशृंगैरवकिरितांस्तत्रसुरेंद्रसैनिकान्॥२७॥स
द्रुमोपलैःअभ्यवर्षन्सुरबलंचिच्छिदुस्तांश्चपूर्ववत्॥२८॥तान्अक्षतान्स्वस्तिमतोनिशाम्यशस्त्रास्त्रपूगैरथवृत्र
नाथाः॥१

भा०ष० रः॥९॥ ॥श्रीशुक उवाच॥ इंद्रमेवं समादिश्य भगवान्विश्वभावनः॥ पश्यतामनिमेषाणां तत्रैवांतर्दधे ह
२२ रिः॥१॥ तथाभियाचितो देवैः ऋषिराथर्वणो महान्॥ मोदमान उवाचेदं प्रहसन्निव भारत॥२॥ अपि वृंदा
रका यूयं न जानीथ शरीरिणां॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः॥३॥ जिजीविषूणां जीवानामा
त्मा प्रेष्ठ इहेप्सितः॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे॥४॥ देवा ऊचुः॥ किंनु तद्दुस्त्यजं ब्रह्मन्पुंसां
भूतानुकंपिनां॥ भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणां॥५॥ नूनं स्वार्थपरो लोको न वेद परसंकटं॥
यदि वेद न याचेत नेति नाह यदीश्वरः॥६॥ ऋषिरुवाच॥ धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः॥ एष वः
प्रियमात्मानं त्यजंतं संत्यजाम्यहं॥७॥ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान्॥ ईहेत भूतदयया स
शोच्यः स्थावरैरपि॥८॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः॥ यो भूतशोकहर्षाभ्यामात्मा शोच
ति हृष्यति॥९॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः॥
१०॥ श्रीशुक उवाच॥ एवं कृतव्यवसितो दध्यङाथर्वणस्तनुं॥ परे भगवति ब्रह्मण्यात्मानं संनयन्जहौ॥११॥
यताक्षासुमनोबुद्धिस्तत्वदृग्ध्वस्तबंधनः॥ आस्थितः परमं योगं न देहं बुबुधे गतं॥ अथेंद्रो वज्रमुद्यम्य नि राम०
र्मितं विश्वकर्मणा॥ मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः॥१३॥ वृतो देवगणैः सर्वैर्गजेंद्रोपर्यशोभ २१

श्रीभगवानुवाच॥प्रीतोहंवः सुरश्रेष्ठामदुपस्थानविद्यया॥आत्मैश्वर्यस्मृतिः पुंसां भक्ति
श्चैवययामपि॥१५॥किंदुरापंमयिप्रीतेतथापिविबुधर्षभाः॥मय्येकांतमतिर्नान्यत्मत्तोवां
छतितत्त्ववित्॥१६॥नवेदकृपणः श्रेयः आत्मनोगुणवस्तुदृक्॥तस्यतानिछतोयछेत्तयदि
सोपितथाविधः॥१७॥स्वयंनिःश्रेयसंविद्वान्नवक्त्यज्ञायकर्महि॥नरातिरोगिणोऽपथ्यंवां
छतोपिभिषक्तमः॥१८॥मघवन्जातभद्रंवोदध्यंचमृषिसत्तमं॥विद्याव्रततपसारंगात्रंया
चंतमाचिरं॥१९॥सवावाऽधिगतोदध्यङ्ङश्विभ्यांब्रह्मनिष्कलं॥यद्वाअश्वशिरोनामतयो
रमरतांव्यधात्॥२०॥दध्यंङाथर्वणस्त्वष्ट्रेवर्माभेद्यंमदात्मकं॥विश्वरूपाययत्प्रादात्त्वष्टाय
त्वमधास्ततः॥२१॥युष्मभ्ययाचिताश्विभ्यांधर्मज्ञोंगानिदास्यति॥ततस्तैरायुधश्रेष्ठोविश्वक
र्मविनिर्मितः॥येनवृत्रशिरोहर्तामत्तेजउपबृंहितः॥२२॥तस्मिन्विनिहतेयूयंतेजोस्त्रायुधसं
पदः॥भूयःप्राप्स्यथभद्रंवोनहिंसंतिचमत्परान्॥२३॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधे
नवमोध्यायः॥९॥दशमे[illegible]बादिष्टदध्यङ्ङस्थिजवज्रधकृत्॥इंद्रोयुध्यतवृत्रेणसासुरेणससनिर्ज्जरै

हिताः॥२०॥देवा ऊचुः॥ वाय्वंवराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंत॥ हराम यस्मै वलिमंतको
सौ विभेति यस्मादरणं ततो स्तु नः॥२१॥ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं॥ विनो
पसर्पत्यपरं हि वालिशः स्वलांगुलेनातितितर्ति सिंधु॥२२॥ यस्योरुशृंगे जगतीं स्वनावं मनुर्यथा वध्य
ततार दुर्गं॥ स एव नस्त्वाष्ट्रभयाद्दुरंतात् त्राताश्रितान् वारिचरोपि नूनं॥२३॥ पुरा स्वयंभूरपि सं
यमांभस्युदीर्णवातोर्मिरवैः कराले॥ एकोरविंदात्पतितस्ततार तस्माद्भयाद्येन स नोस्तु पारः॥२४॥
य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं॥ वयं न यस्यापि पुरः समीहतः पश्याम लिंगं
पृथगीशमानिनः॥२५॥ यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव॥ कृतावतार
स्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च॥२६॥ तमेव देवं वयमात्मदैवतं परं प्रधानं पु
रुषं विश्वमन्यं॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा॥२७॥ श्रीशुक उवाच॥ इ
ति तेषां महाराज सुराणामुपतिष्ठतां॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः॥२८॥ आत्मतु
ल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ॥ पर्युपासितमुन्निद्रशरदंवुरुहेक्षणं॥२९॥ दृष्ट्वा तम

भा० ष० वनै॥स्ववैरस्त्वाणाद्भूदसंप्लुवा॥आदंडवत्पतितस्तराजन्म्रजांगैरन्याखस्तुष्टुवुः॥३०॥देवा ऊचु॥नमस्तेय
१९ ज्ञवीर्याय वयसेउततेनमः॥नमस्तेह्यस्तचक्रायनमःसुपुरुहूतवे॥३१॥यद्ग्रंगतीनांतिसृणामिशि
तुःपरमंपदं नावीचीनोविसर्गस्यधातर्वेदितुमर्हति॥३२॥ॐनमस्तेस्तुभगवान्नारायणवासुदेवा
दिपुरुषमहापुरुषमहानुभावपरममंगलपरमकल्याणपरमकारुणिककेवलजगदाधा
रलोकैकनाथसर्वेश्वरलक्ष्मीनाथपरमहंसपारिव्राजकैःपरमेणात्मयोगसमाधिनापरिभावितं
परिस्फुटपारमहंस्यधर्मेणोद्घाटिततमः॥कपाटद्वारेवित्तेपावृतआत्मलोकेस्वयमुपलब्धनि
जसुखानुभवोभवान्॥१॥दुरवबोधइवतवायंविहारयोगोयदशरणोशरीरइदमनवेक्षिता
स्मत्समवाय॥आत्मनैवाविक्रियमाणेनसगुणमगुणःसृजसिसहरसि॥२॥अथतत्रभवान्किं
देवदत्तवदिहगुणविसर्गपतितः॥पारतंत्र्येणस्वकृतकुशलाकुशलंफलमुपाददाति॥आहोस्विदा
त्मारामउपशमशील॥समंजसदर्शनउदास्तइतीहवावनविदाम॥३॥नहिविरोधउभयंभग
वत्यपरिगणितगुणगणईश्वरेनवगाह्यमहात्म्येअर्वाचीनविकल्पवितर्कविचारप्रमाणाभा राम०
सकुतर्कशास्त्रकलिलांतः॥करणाश्रयदुरवग्रहवादिनांविवादानवसरे॥उपरतसमस्तमाया १९

मयेकेवलरावात्ममायामंतर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥४॥ समविषममती
नां मतमनुसरसि यथा रज्जुखंडः सर्पादिधियां ॥ स वा हि पुनः सर्ववस्तु स्वरूपः सर्वेश्वरः सकलजगत्का
रणकारणभूत ॥ सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥६॥ अथ ह वा
व तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारि
तदृष्टश्रुतविषयसुखलेशाभासाः ॥ परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि ॥ सर्वा
त्मनि नितरां निरंतरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः ॥ स्वार्थकुशला ह्यात्मप्रियसुहृ
द ॥ साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः ॥७॥ त्रिभुवनात्म
भवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषा
मनुपक्रमसमयो यमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडध
रदधर्थ ॥ एवमेतमपि भगवन् जहि त्वाष्ट्रमुत यदि मन्यसे ॥८॥ अस्माकं तावकानां तव नतानां त
ततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृता

भा०६। नामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलयावा
२० चांतस्तापमनघार्हसि शमयितुं ॥९॥ अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनि
मित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामंतर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्व
रूपेण ॥ प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः
सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः ॥ कियानिह वा अर्थविशेषो
विज्ञापनीयः स्यात् विस्फुलिंगादिभिरिव हिरण्यरेतसः ॥१०॥ अत एव स्वयं तदुपकल्पयास्माकं भ
गवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपासृ
तानां वयं यत्कामेनोपसादिताः ॥११॥ अथो ईश जहि त्वाष्टं ग्रसंतं भुवनत्रयं ॥ ग्रस्तानि येन नः कृ
ष्णतेजांस्यस्त्रायुधानि च ॥१२॥ हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरु
पक्रमाय ॥ सत्संग्रहाय भवपांथनिजाश्रमाप्तावंते परीष्टगतये हरये नमस्ते ॥१३॥ श्रीशुक उवा
च ॥ अथैवमीडितो राजन्सादरं त्रिदशैर्हरी ॥ स्वमुपस्थानमाकर्ण्य प्राह तानभिनंदितः ॥१४॥

भा० ष० दिसं वं धेमिषेतिर्दर्शयित्तुं योगवलेनमेव ज्ञातीनां ॥ २ ॥ ॥ श्रीशुकउवाच ॥ अथदेवऋषी राजन्
३१ संपरेतंनृपात्मजं ॥ दर्शयित्वेतिहोवाच ज्ञातीनामनुशोचतां ॥ १ ॥ नारदोवाच ॥ जीवात्मन्पश्यभ
द्रंते मातरंपितरं चते ॥ सुहृदोवांधवास्तप्तान्शुचा त्वत्कृतयाभृयं ॥ २ ॥ कलेवरंसमाविश्यशेषमा
युसुहृद्वृत ॥ भुंक्ष्वभोगान्पितृप्रतान्अधितिष्ठन्पासनं ॥ ३ ॥ जीवउवाच ॥ कस्मिन्जन्मन्य
मीमह्यंपितरोमातरोभवत् ॥ कर्मभिर्भ्राम्यमाणस्यदेवतिर्यङ्नृयोनिषु ॥ ४ ॥ वंधुज्ञात्यरिमध्य
स्थमित्रोदासीनविद्विषः ॥ सर्वएवहिसर्वेषांभवंतिक्रमशोमिथः ॥ ५ ॥ यथावस्तूनिपण्यानिहे
मादीनिततस्ततः ॥ पर्यटंतिनरेष्वेवंजीवोयोनिषुकर्तृषु ॥ ६ ॥ नित्यस्यार्थस्यसंवंधोह्यनित्यो
दृश्यतेनृषु ॥ यावद्यस्यहिसंवंधोममत्वंतावदेवहि ॥ ७ ॥ एवंयोनिगतोजीवसनित्योनिरहं
कृतः ॥ यावद्यत्रोपलभ्येततावत्स्वत्वंहितस्यतत् ॥ ८ ॥ एषनित्योव्ययःसूक्ष्मएषसर्वाश्रयःस्व
दृक् ॥ आत्ममायागुणैर्विश्वमात्मानंसृजतेप्रभुः ॥ ९ ॥ नह्यस्यातिप्रियःकश्चिन्नपरःस्वपरोपि
वा ॥ एकःसर्वधियांद्रष्टाकर्तॄणांगुणदोषयोः ॥ १० ॥ नादत्तआत्माहिगुणंनदोषंनक्रियाफलं ॥ उ रा म०
३१

भा० ६
२०

चामिह प्रभो ॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९ ॥ तदैव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञा
त्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहं ॥ २० ॥ अधुना पुत्रिणां तापो भवतैवानुभूयते ॥ एवं दारा गृहा
रायो विविधैश्वर्यसंपदः ॥ शब्दादयश्च विषयाश्चला राज्यविभूतय ॥ मही राज्यं बलं कोशो भृत्यामा
त्याः सुहृज्जनाः ॥ सर्वेपि शूरसेनेमे शोकमोहभयार्तिदा ॥ गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥
२३ ॥ दृश्यमाना विनार्थेन न दृश्यंते मनोभवाः ॥ कर्मभिर्ध्यायतो नाना कर्माणि मनसोभवम् ॥ २४ ॥
अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ॥ देहिनो विविधक्लेशः संतापकृदुदाहृतः ॥ २५ ॥ तस्मा
त्स्वस्थेन मनसा विमृश्य गतिमात्मनः ॥ द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश ॥ २६ ॥ नारदोवाच ॥
एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम ॥ यां धारयन् सप्तरात्रात् द्रष्टा संकर्षणं विभुं ॥ २७ ॥ यत्पादमूल
मुपसृत्य नरेंद्र पूर्वे सर्वादयो भ्रममिमं द्वितयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवान
पि परं न चिरादुपैति ॥ २८ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे पंचदशोध्याय ॥ १५ ॥ षोडशे तु सुते
नैव विशोकीकृतवान्नृपं ॥ श्रीदेवर्षिर्महाविद्यां नारदः शेषतोषिणीं ॥ श्री दोतावत्पुत्रमुखेनैव पितृपुत्रा

हरि॥अग्रेतिष्ठतिमांत्रेमेनचेदग्राम्यसुखस्पृहा॥५॥एवंसुरगणान्क्रुद्धोभीषयन्वपुषारिपून्॥व्यनद
त्सुमहाप्राणोयेनलोकाविचेतसः॥६॥तेनदेवगणाःसर्वेवृत्रविस्फोरनेनवै॥निपेतुर्मूर्छिताभूमौयथैवा
शनिनाहता॥७॥ममर्दपद्भ्यांसुरसैन्यमातुरंनिमीलिताक्षंरणरंगदुर्मदः॥गांकंपयन्नुद्यतशूलओ
जसानालंवनंयूथपतिर्यथोन्मदः॥८॥विलोक्यतंवज्रधरोत्यमर्षितःस्वशत्रवेभिद्रवतेमहागदां॥चिक्षे
पतामापततींसुदुःसहांजग्राहवामेनकरेणलीलया॥९॥सइंद्रशत्रुःकुपितोभृशंतयामहेंद्रवाहंग
दयोरुविक्रमः॥जघानकुंभस्थलउन्नदन्मृधेतत्कर्मसर्वेसमपूजयन्नृप॥१०॥ऐरावतोवृत्रगदाभिमृष्टो
विघूर्णितोद्रिःकुलिशाहतोयथा॥अपासरद्भिन्नमुखःसहेंद्रोमुंचन्नसृक्सप्तधनुर्भृशार्तः॥११॥नसन्नवा
हायविषण्णचेतसेप्रायुंक्तभूयःसगदांमहात्मा॥इंद्रोमृतस्यंदिकराभिमर्शवीतव्यथःक्षतवाहोऽवतस्थे॥१२॥
सतंनृपेंद्राहवकाम्ययारिपुंवज्रायुधंभ्रातृहणंविलोक्य॥स्मरंश्चतत्कर्मनृशंसमंहःशोकेनमोहेनहसन्ज
गाद॥१३॥वृत्रउवाच॥दिष्ट्याभवान्मेसमवस्थितोरिपुःयोब्रह्महागुरुहाभ्रातृहाच॥दिष्ट्यानृणोऽद्यहमस
त्तमत्वयामच्छूलनिर्भिन्नदृषद्दृदाचिरात्॥१४॥योनोग्रजस्यात्मविदोद्विजातेर्गुरोरपापस्यचदीक्षितस्य॥

भा०ष० विश्रम्भ्यारखड्गेन शिरांसि वृश्चन्न पशोरिवाकरुणः स्वर्गकामः॥१५॥ ह्रीश्रीरयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरु
२३ षादैश्च गर्ह्यं॥ कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समरे तिगृध्राः॥१६॥ अन्ये नु ये त्वेह नृशंसमज्ञाः ये ह्यु
द्यतास्त्राः प्रहरंति मह्यं॥ तैर्भूतनाथान् सगणान्निशात त्रिशूल निर्भिन्नगलैर्यजामि॥१७॥ अथो हरे मे कुलि
शेन वीर हर्ता प्रमथ्यैव शिरो यदीह॥ तत्रानृणो भूतवलिं विधाय मनस्विनां पादरजः प्रपत्स्ये॥१८॥ सुरेश
कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघं॥ मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याञ्चा॥
१९॥ नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः॥ तेनैव शत्रुं जहि लुलित ग्राम्यपाशो गतिं मु
नेर्याम्यपविद्धलोकः॥२०॥ पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां॥ नराति यद्द्वेष उद्वेग
आधिर्मदः कलिर्व्यसनं संप्रयासः॥२२॥ त्रैवर्गिकायास विघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र॥ ततो
नुमेयो भगवत्प्रसादो यो दुर्लभो किंचनगोचरोन्यैः॥२३॥ अहं हरे तव पादैकमूलदासानुदासो भवितास्मि
भूयः॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः॥२४॥ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौ
मं न रसाधिपत्यं॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे॥२५॥ अजातपक्षा इव मातरं खगाः स्तन्यं भा०ष०
यथा वत्सतराः क्षुधार्त्ताः॥ प्रियं प्रियेव व्युषितं विषण्णा मनोरविंदाक्ष दिदृक्षते त्वां॥२६॥ ममोत्तमश्लोकजने २३

षु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ॥ त्वन्मायया त्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥२७॥ इ
ति श्रीभागवते महापुराणे षष्ठस्कंधे एकादशोध्यायः ॥११॥ द्वादशे तु विषण्णेन स्वयमुत्साहितेन तु ॥
महेंद्रेण महायुद्धे वृत्रस्य वध ईर्यते ॥१॥ ॥ ऋषिरुवाच ॥ एवं जिहासुर्नृप देहमाजौ मृत्युं वरं वि
जयान्मन्यमानः ॥ शूलं प्रगृह्याभ्यपतत्सुरेंद्रं यथा महापुरुषं कैटभोप्सु ॥१॥ ततो युगांताग्निकठोरजि
ह्वमाविध्य शूलं तरसासुरेंद्रः ॥ क्षिप्त्वा महेंद्राय विनद्य वीरो हतोसि पापेति रुषा जगाद ॥२॥ ख आप
ततद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुःप्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्यो
रगराजभोगं ॥३॥ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रं ॥ हनौ ततांडेंद्रमथामरेभं
वज्रं च हस्तान्यपतन्मघोनः ॥४॥ वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः ॥ अपूज
यंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशं ॥५॥ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरि
सन्निधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥६॥ युयुत्सतां कुत्रचिदा
ततायिनां जयः सदैकत्र न वै परात्मनां ॥ विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनात

भा०ष० नं ॥७॥ लोकाः सपाला यस्येमे श्वसंति विवशो द्विजा इव शिवाबद्धाः स काल इह कारणं ॥८॥ ओजः सहो

२४ बलं प्राणममृतं मृत्युरेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडं ॥९॥ यथा दारुमयी नारी यथा यंत्र

मयो मृगः ॥ एवं भूतानि मघवन्नीशतंत्राणि विद्धि भोः ॥१०॥ पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेंद्रियाः ॥

शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥११॥ अविद्वानेवमात्मानं मन्यतेनीशमीश्वरं ॥ भूतैः सृ

जति भूतानि ग्रसते तानि तैः स्वयं ॥१२॥ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ॥ भवंत्येव हि त

त्काले यथानिच्छोर्विपर्यया ॥१३॥ तस्मादकीर्तियशसोर्जयापजययोरपि ॥ समः स्यात्सुखदुःखाभ्यां

मृत्युजीवितयोस्तथा ॥१४॥ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ तत्र साक्षिणमात्मानं यो वेद स

न बध्यते ॥१५॥ पश्य मां निर्जितं शत्रु वृक्णायुधभुजं मृधे ॥ घटमानं यथाशक्ति तव प्राणजिहीर्ष

या ॥१६॥ प्राणग्लहोयं समर इष्वक्षो वाहनासनः ॥ अत्र न ज्ञायतेमुष्य जयोमुष्य पराजयः ॥१७॥ श्री

शुको वाच ॥ इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥१८॥ अ

हो दानव सिद्धोसि यस्य मे मतिरीदृशी ॥ भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरं ॥१९॥ भवानतार्षी

न्मायांवैवैष्णवींजनमोहिनीं ॥ यद्विहायासुरंभावंमहापुरुषतांगतः ॥ २० ॥ खल्विदंमहदाश्चर्यंयद्र
जःप्रकृतेस्तव ॥ वासुदेवेभगवतिसत्वात्मनिदृढामतिः ॥ २१ ॥ यस्यभक्तिर्भगवतिहरौनिःश्रेयसे
श्वरे ॥ विक्रीडितोमृतांभोधौकिंक्षुद्रैःखातकोदकैः ॥ २२ ॥ श्रीशुकउवाच ॥ इतिब्रुवाणावन्योन्यं
धर्मजिज्ञासयानृप ॥ युयुधातेमहावीर्याविंद्रवृत्रौयुधांपती ॥ २३ ॥ आविध्यपरिघंवृत्रःकार्
ष्णायसमरिंदमः ॥ इंद्रायप्राहिणोद्घोरंवामहस्तेनमारिष ॥ २४ ॥ सतुवृत्रस्यपरिघंकरंचपरिघो
पमं ॥ चिच्छेदयुगपद्देवोवज्रेणशतपर्वणा ॥ २५ ॥ दोर्भ्यामुत्कृत्तमूलाभ्यांबभौरक्तस्रवो
सुरः ॥ छिन्नपक्षोयथागोत्रःखाद्भ्रष्टोवज्रिणाहतः ॥ २६ ॥ कृत्वाधराहनुंभूमौदैत्योदि
व्युत्तरांहनुं ॥ नभोगंभीरवक्त्रेणलेलिहोल्बणजिह्वया ॥ २७ ॥ दंष्ट्राभिःकालकल्पाभिर्ग्र
सन्निवजगत्त्रयं ॥ अतिमात्रमहाकायआक्षिपंस्तरसागिरीन् ॥ २८ ॥ गिरिराट्पादचारी
वपद्भ्यांनिर्जरयन्महीं ॥ जग्राससमासाद्यवज्रिणंसहवाहनं ॥ २९ ॥ महाप्राणोमहा
वीर्योमहासर्पइवद्विपं ॥ वृत्रग्रस्तंतमालक्ष्यसप्रजापतयःसुराः ॥ ३० ॥ हाकष्टमितिनिर्वि

णोचुक्रुशुः समहर्षयः ॥ निर्गीर्णोप्यसुरेंद्रेण न ममारोदरं गतः ॥३१॥ महापुरुषसन्नद्धो यो
गमायाबलेन च ॥ भित्वा वज्रेण तत्कुक्षिं निष्क्रान्तो बलभिद्विभुः ॥ उच्चकर्त शिरः शत्रोर्गि
रिशृंगमिवौजसा ॥३२॥ वज्रस्तु तत्कंधरमाशुवेगः कृंतन्समंतात्परिवर्तमानः ॥ न्यपा
तयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥३३॥ तदा च खे दुंदुभयो विनेदुर्गंध
र्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ॥३४॥
वृत्रस्य देहान्निःक्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानामलोकं समपद्यत
३५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रवधो नाम द्वादशोध्यायः ॥१२॥ त्रयोदशे तु
वृत्रस्य ब्रह्महत्यामहाभयात् ॥ चिरं तु शचीचितः शक्रो विष्णुनेति निहूयते ॥१॥ ॥ श्रीशुक उ
वाच ॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रि
याः ॥१॥ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयं ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादय
स्ततः ॥२॥ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ॥ येनासन्सुखिनो देवा ह

रेंद्रः खं कुतो भवेत्॥३॥ श्रीशुक उवाच॥ वृत्रविक्रमसंविग्नाः सर्वे देवा महर्षिभिः॥ तदर्थायार्थयन्निंद्रं ने
च्छद्भीतो बृहद्वधात्॥४॥ इंद्रोवाच॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं॥ विभक्तमनुगृह्णद्भि
र्वृत्रहत्यां क्व मार्ज्म्यहं॥५॥ श्रीशुक उवाच॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन्॥ याजयिष्याम
इंद्रं हयमेधेन मा स्म भैः॥६॥ हयमेधेन पुरुषं परमात्मानमीश्वरं॥ इष्ट्वा नारायणं देवं मोक्ष्यसेपि जग
द्वधात्॥७॥ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान्॥ श्वादः पुल्कसको वापि शुद्ध्येरन्यस्य की
र्तनात्॥८॥ तमश्वमेधेन महामखेन श्रद्धान्वितोस्माभिरनुष्ठितेन॥ हत्वापि सब्रह्म चराचरं त्वं न
लिप्यसे त्वं खलनिग्रहेण॥९॥ श्रीशुक उवाच॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं॥ ब्रह्महत्या
हते तस्मिन्नाससाद वृषाकपिं॥१०॥ तयेंद्रः स्मायसंतापं निर्वृतिर्नामुपाविशत्॥ ह्रीमंतं वाच्यतां
प्राप्तं सुखयंत्यपि नो गुणाः॥११॥ तां ददर्शानुधावंतीं चांडालीमिव रूपिणीं॥ जरया वेपमानांगीं
यक्ष्मग्रस्तामसृक्पटां॥१२॥ विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीं॥ मीनगंधासुगंधेन
कुर्वतीं मार्गदूषणं॥१३॥ नभो गतो दिशः सर्वाः सहस्राक्षो विशांपते॥ प्रागुदीचीं दिशं तू

भा०ष०
२६

णि प्रविष्टो न प्रमानसं ॥२४॥ संगावसत्सु पुष्करनालतंतून् अलब्धभोगोयदिहाग्निदूतः ॥ वर्षाणिसाहस्र
मलक्षितोंतःसचिंतयन् ब्रह्मवधाद्विमोक्षं ॥२५॥ तावत्त्रिणाकं नहुषः शशासविद्यातपोयोगबला
नुभावः ॥ ससंपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चांगतिमिंद्रपत्न्या ॥२६॥ ततोगतोब्रह्मगिरोपहूतस्त
तंमरध्यानानिवारिताघः ॥ पापस्तुदिग्देवतयाहतौजास्तंनाभ्यभूद्वीक्षितविष्णुपत्न्या ॥२७॥ तंचब्रह्म
र्षयोभेत्यहयमेधेनभारत ॥ यथावद्दीक्षयांचक्रुःपुरुषाराधनेनह ॥२८॥ अथेज्यमानेपुरुषेसर्वदेवम
यात्मनि ॥ अश्वमेधेमहेंद्रेणवितते ब्रह्मवादिभिः ॥२९॥ सवैत्वाष्ट्रवधोभूयानपिपापचयोनृप ॥ नीत
स्तेनैवशून्यायनिहारइवभानुना ॥३०॥ सवाजिमेधेनयथोदितेनवितायमानेनमरीचिमिश्रैः ॥ इष्ट्वाधि
यज्ञंपुरुषंपुराणमिंद्रोमहानासविधूतपापः ॥३१॥ इदंमहाख्यानमशेषपाप्मनांप्रक्षालनंतीर्थप
दानुकीर्त्तनं ॥ भक्त्युच्छ्रयंभक्तजनानुवर्णनंमहेंद्रमोक्षंविजयंमरुत्वतः ॥३२॥ पठेयुराख्यानमिदं
सदाबुधाः शृण्वंत्यथोपर्वणिपर्वणींद्रियं ॥ धन्यंयशस्यंनिखिलाघमोचनंरिपुंजयंस्वस्त्ययनं
तथायुषं ॥३३॥ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेइंद्रविजयोनामत्रयोदशोध्यायः ॥१३॥

वृत्रस्यज्ञानमत्याश्चर्यंत्वापृष्टपरीक्षिता॥हेतुमाहचतुर्भिरितःप्राक्जन्मचरितोक्तिभिः॥चतुर्दशेतु
सहसाकृष्टलक्षेसुतेमृते॥चित्रकेतोरितिसहदृतिशोकोनिरूप्यते॥१॥ ॥राजोवाच॥ रज
स्तमःस्वभावस्यब्रह्मन्वृत्रस्यपाप्मनः॥नारायणेभगवतिकथमासीद्दृढमतिः॥१॥देवानांशुद्धस
त्वानामृषीणांचामलात्मनां॥भक्तिर्मुकुंदचरणेनप्रायेणोपजायते॥२॥रजोभिःसमासंख्या
ताःपार्थिवैरिहजंतवः॥तेषांयेकेचनेहंतेश्रेयोवैमनुजादयः॥३॥प्रायोमुमुक्षवस्तेषांकेच
नैवद्विजोत्तमाः॥मुमुक्षूणांसहस्रेषुकश्चिन्मुच्येतसिध्यति॥४॥मुक्तानामपिसिद्धानांनारा
यणपरायणः॥सुदुर्लभःप्रशांतात्माकोटिष्वपिमहामुने॥५॥वृत्रस्तुसकथंपापःसर्वलोको
पतापनः॥इत्थंदृढमतिःकृष्णआसीत्संग्रामउल्बणे॥६॥अत्रनःसंशयोभूयान्श्रोतुंकौतू
हलंविभो॥यःपौरुषेणसमरेसहस्राक्षमतोषयत्॥७॥सूतोवाच॥परिक्षितोथसंप्रश्नंभगवा
न्बादरायणिः॥निशाम्यश्रद्दधानस्यप्रतिनंद्यवचोब्रवीत्॥८॥श्रीशुकोवाच॥श्रृणुष्वावहितो

भा०ष० राजन्निति हासमिमं यथा॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि॥९॥ आसीद्राजा सार्वभौमः
२७ शूरसेनेषु वै नृप॥ चित्रकेतुरिति ख्यातो यस्यासीत्कामधुग्मही॥१०॥ तस्य भार्यासहस्राणां
सहस्राणि दशाभवन्॥ सांतानिकश्चापि नृपो न लेभे तासु संततिं॥११॥ रूपौदार्यवयोजन्मवि
द्यैश्वर्यश्रियादिभिः॥ संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापतेरभूत्॥१२॥ न तस्य संपदः सर्वा महि
ष्यो वामलोचनाः॥ सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः॥१३॥ तस्यैकदा तु भवनमंगिरा
भगवान्नृषिः लोकाननुचरन्नेतानुपागच्छद्यदृच्छया॥१४॥ तं पूजयित्वा विधिवत्प्रत्यु
त्थानार्हणादिभिः॥ कृतातिथ्यमुपासीदत्सुखासीनं समाहितः॥१५॥ महर्षिस्तमुपासीनं प्र
श्रयावनतं क्षितौ॥ प्रतिपूज्य महाराज समाभाष्येदमब्रवीत्॥१६॥ अंगिरा उवाच॥ अपि ते
नामयं स्वस्ति प्रकृतीनां तथात्मनः॥ यथा प्रकृतिभिर्गुप्तः पुमान्राजा च सप्तभिः॥१७॥ आत्मानं
प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात्॥ राज्ञा तथा प्रकृतयो नरदेवाहिताधयः॥१८॥ अपि दारा रा०म०
२७

प्रज्यामात्याश्रेण्योथमंत्रिणः पोराजानपदाभूपा आत्मजावशवर्तिनः ॥१९॥ यस्यात्मानुवशश्चेत्स्यात्स
र्वेतद्वशगा इमे ॥ लोकाः सपाला यच्छंति सर्वे बलिमतंद्रिताः ॥२०॥ आत्मानप्रीयते नात्मापरतः स्वतए
ववालक्षये लब्धकामं त्वां चिंतयाशवलं मुखं ॥२१॥ एवं विकल्पितो राजन् विदुषा मुनिनापि सः ॥
प्रश्रयावनतोभ्याह प्रजाकामस्ततो मुनिं ॥२२॥ चित्रकेतुरुवाच ॥ भगवन् किंनविदितं तपोज्ञानसमा
धिभिः ॥ योगिनां ध्वस्तपापानां वहिरंतः शरीरिषु ॥२३॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितं ॥
भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥२४॥ लोकपालैरपिप्रार्थ्याः साम्राज्यैश्वर्यसंपदः ॥ ननंदयंत्य
प्रजंमां क्षुत्तृट्कामभिवापरे ॥२५॥ ततः पाहि महाभाग पूर्वैः सह गतं तमः ॥ यथा तरेम दुस्तारं प्रजया त
द्विधेहि नः ॥२६॥ श्रीशुक उवाच ॥ इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ॥ श्रपयित्वा चरुं त्वा
ष्टुं त्वष्टारमजयद्द्विजः ॥२७॥ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणांच भारतः ॥ नाम्ना कृतद्युतिस्तस्मै
यज्ञोच्छिष्टमदाद्द्विजः ॥२८॥ अथाह नृपतिं राजन् भवितैकस्तवात्मजः ॥ हर्षशोकप्रदस्तुभ्यमिति
ब्रह्मासुतो ययौ ॥२९॥ सापि तस्याशनादेव चित्रकेतोरधारयत् ॥ गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरि

भा०ष० वात्मजं ॥३०॥ तस्यात्रनुदिनं गर्भः शुक्लपक्षइवोडुपः ॥ ववृधे शूरसेनेशे तेजसा ज्ञानकैर्नृप ॥३१॥ अथ
२८ कालउपावृत्ते कुमारः समजायत ॥ जनयन् शूरसेनानां शृण्वतां परमां मुदं ॥३२॥ हृष्टो राजा कुमा
रस्य स्नातः शुचिरलंकृतः ॥ वाचयित्वाशिषो विप्रैः कारयामास जातकं ॥३३॥ तेभ्यो हिरण्यं रज
तं वासस्याभरणानि च ॥ ग्रामान् हयान् गजान् प्रादात् धेनुनामर्बुदानि षट् ॥३४॥ ववर्ष का
ममन्येषां पर्जन्य इव देहिनां ॥ धन्यं यशस्यमायुष्यं कुमारस्य महामना ॥३५॥ कृच्छ्रलब्धेऽथ राज
र्षेस्तनयेनुदिनं पितुः ॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोन्ववर्धत ॥३६॥ यातुल्लवा तितरां पुत्रे स्नेहो
मोहसमुद्भवः ॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोभवत् ॥३७॥ चित्रकेतुरतिप्रीतिर्यथा दारे
प्रजावति ॥ न तथान्येषु संजज्ञे बालं लालयतोन्वहं ॥३८॥ ताः पर्यतप्यन् आत्मानं गर्हयंत्योभ्य
सूयया ॥ अनपत्येन दुःखेन राज्ञोनादरणेन च ॥३९॥ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंम
तां ॥ सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृतां ॥४०॥ दासीनां को नु संतापः स्वामिनः परिचर्यया ॥
अभीक्ष्णं लब्धकामानां दास्या दासी च दुर्भगः ॥४१॥ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा ॥ रा

ज्ञोसंमतवृतीनां विद्वेषो वलवानभूत् ॥४२॥ विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः ॥ गरं ददुः कुमाराय दु
र्मर्षान्नृपतिंप्रति ॥४३॥ हृतद्युतिं न जानं तीसपत्नीनामघं महत् ॥ सुप्त एवेति संचिंत्य निरैक्ष्य विचर
द्गृहे ॥४४॥ शयानं सुचिरं वालमुपधार्य मनीषिणी ॥ पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ॥
४५॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनं ॥ प्राणेंद्रियात्मभिस्त्यक्तं हतास्मीत्यपतद्भुवि ॥४६॥
तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नंत्याः कराभ्यामुर उच्चकैरपि ॥ प्रविश्य राज्ञी त्वरयात्मजांति
कं ददर्श वालं सहसा मृतं सुतं ॥४७॥ पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरु
हांवरा ॥ ततोन्तःपुरवर्तिनो जनान्नराश्च नार्यश्च निशम्य रोदनं ॥४८॥ आगत्य तुल्य
व्यसनाः सुदुःखिताः ॥ ताश्च व्यलीकं रुरुदुः कृतागतः ॥ श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्ट
दृष्टिः प्रपतन्स्खलन्पथि ॥४९॥ स्नेहानुवंधैधितया शुचा भृशं विमूर्छितोनुप्रकृतिर्द्विजे
र्वृत ॥ पपात वालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांवरः ॥५०॥ दीर्घं श्वसन्व्याष्पकलो

परोधतो निरुद्धकंठेन शशाक भाषितुं ॥ पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंत
तिं ॥५१॥ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा स्तनद्वयं कुंकुमगंधमं
डितं निषिंचती सांजनवाष्पविंदुभिः ॥५२॥ विकीर्य केशान् विगलस्रजः सुतं सुशोच चित्रं कु
ररीव सुस्वरं ॥५३॥ अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ॥ परे नु जी
वत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥५४॥ नहि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणा
मस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥५५॥ त्वं तात
नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं ॥ अंजस्तरेम भवताप्रजदुस्तरं
यत् ध्वांतं न याह्यकरुणेन यमेन दूरं ॥५६॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति
नृपनंदन संविहर्तुं ॥ सुप्तश्चिरं ह्यशनया च भवान् परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्व
कानां ॥५७॥ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं ॥ किं वा ग राम०
तोस्यपुनरन्वयमन्यलोकं नीतो घृणेन न शृणोमि कला गिरस्ते ॥५८॥ श्रीशुक उवाच ॥ विलपं २९

त्वामृतं पुत्रमितिचित्रविलापनैः॥ चित्रकेतुर्भृशंतप्तोमुक्तकंठोरुरोदह॥५९॥तयोर्विलपतोःसर्वे
दंपत्योस्तदनुव्रताः॥रुरुदुःस्मनरानार्य्यःसर्वमासीदचेतसं॥६०॥एवंकश्मलमापन्नंनष्टसंज्ञ
मनायकंज्ञात्वांगिरानाममुनिराजगामसनारदः॥६१॥इतिश्रीभागवतेमहापुराणेषष्टस्कंधे
चतुर्दशोध्यायः॥१४॥ततःपंचदशेचित्रकेतोःशोकापनोदनं॥कृतंतत्वोपदेशेननारदेनां
गिरोयुजा॥१॥ ॥श्रीशुकोवाच॥ऊचतुर्मृतकोपांतेपतितंमृतकोपमं॥शोकाभिभूतं
राजानंबोधयंतौसदुक्तिभिः॥१॥कोयंस्यात्तवराजेंद्रभवान्यमनुशोचति॥त्वंचास्यकतमःसृष्टौ
पुरेदानीमतःपरं॥२॥यथाप्रयांतिसंयांतिस्रोतोवेगेनवालुकाः॥संयुज्यंतेवियुज्यंतेतथा
कालेनदेहिनः॥३॥यथाधानासुवेधानाभवंतिच॥एवंभूतेषुभूतानिचोदितानीशमायया॥४॥ नभवंति
वयंचत्वंचयेचेमेतुल्यकालाश्चराचराः॥जन्ममृत्योर्यथापश्चात्प्राङ्नैवमधुनापिभो॥
५॥भूतैर्भूतानिभूतेशःसृजत्यवतिहंत्यजः॥आत्मसृष्टैरस्वतंत्रैरनपेक्षोपिबालवत्॥६॥
देहेनदेहिनोराजन्देहाद्देहोभिजायते॥बीजादेवयथाबीजंदेह्यर्थइवशाश्वतः॥७॥दे

भा० षा० हि देहविभागोयमविवेककृतः पुरा॥ जातिव्यक्तिविभागोयं यथा वस्तुनि कल्पितः॥८॥ श्रीशुकोवाच॥
३० एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः॥ प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत॥९॥ रा
जोवाच॥ कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसां॥ अवधूतेन वेषेण गूढाविह समागतौ॥१०॥
चरंति ह्यवनौ कामं ब्रह्मण्या भगवत्प्रियाः॥ मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः॥११॥ कुमा
रो नारद ऋभुरंगिरा देवलोसितः॥ अपांतरतमो व्यासो मार्कंडेयोथ गौतमः॥१२॥ वशिष्ठो भगवा
न्रामः कपिलो बादरायणिः॥ दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथारुणिः॥१३॥ लोमशश्च्यव
नो दत्त आसुरिः सपतंजलिः॥ ऋषिर्वेदशिरो बोध्यो मुनिः पंचशिखस्तथा॥१४॥ हिरण्यनाभः
कौशल्यः श्रुतदेव ऋतध्वजः॥ एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः॥१५॥ तस्मात्युवां ग्राम्यप
शोर्मम मूढधियः प्रभू॥ अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यतां॥१६॥ अंगिरा उवाच॥ अहं ते
पुत्रकामस्य पुत्रदोस्म्यंगिरा नृप॥ एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः॥१७॥ इत्थं त्वां पुत्र राम०
शोकेन मग्नं तमसि दुस्तरे॥ अतदर्हमनुस्मृत्य महापुरुषगोचरं॥१८॥ अनुग्रहाय भवतः प्राप्तावा ३०

दासीनवदासीनःपरावरदृगीश्वरः॥११॥श्रीशुकउवाच॥इत्युदीर्यगतोजीवोज्ञातयास्तस्यतेतदा॥
विस्मितामुमुचुःशोकंछित्वात्मस्नेहशृंखलां॥१२॥निर्हृत्यज्ञातयोज्ञातेर्देहंकृत्वोचिताःक्रियाः॥
तत्यजुर्दुस्त्यजंस्नेहंशोकमोहभयार्त्तिदं॥१३॥बालघ्न्योव्रीडितास्तत्रबालहत्याहतप्रभा॥बा
लहत्याव्रतंचेरुर्ब्राह्मणैर्यन्निरूपितं॥यमुनायांमहाराजस्मरंत्योद्विजभाषितं॥१४॥सइत्थं
प्रतिबुद्धात्माचित्रकेतुर्द्विजोक्तिभिः॥गृहांधकूपान्निःक्रांतःसरःपंकादिवद्विपः॥१५॥का
लिंद्यांविधिवत्स्नात्वाकृतपुण्यजलक्रियः॥मौनेनसंयतःप्राणोब्रह्मपुत्राववंदत॥१६॥अ
थतस्मैप्रपन्नायभक्तायप्रयतात्मने॥भगवन्नारदःप्रीतोविद्यामेतामुवाचहः॥१७॥नमस्तुभ्यं
भगवतेवासुदेवायधीमहि॥प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच॥१८॥नमोविज्ञानमा
त्रायपरमानंदमूर्तये॥आत्मारामायशांतायनिवृत्तद्वैतदृष्टये॥१९॥आत्मानंदानुभूत्यैवन्य
स्तशक्त्यूर्मयेनमः॥हृषीकेशायमहतेनमस्तेविश्वमूर्त्तये॥२०॥वचस्युपरतेऽप्राप्ययएकोमनसा
सह॥अनामरूपश्चिन्मात्रःसोव्यान्नःसदसत्परः॥२१॥यस्मिन्निदंयतश्चेदंतिष्टत्यप्येतिजायते॥

भा०ष०
३२

मन्मयेषिवमज्जो स्तस्मैते ब्रह्मणे नमः ॥२२॥ यन्नस्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहि
श्च विततं व्योमवत्तं नतोस्म्यहं ॥ देहेंद्रियप्राणमनोधियोमी यदंशाविद्धाः प्रचरति कर्मसु नैवा
न्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टपदेशमेति ॥२४॥ ॐ नमो भगवते महापुरुषाय महानुभावाय म
हाविभूतिपतये सकलसात्वतपरिवृढ ॥ निकरकरकमलकुड्मलोपलालितचरणारविं
दयुगल परमेष्टिन्नमस्ते ॥२५॥ श्रीशुक उवाच ॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ॥ य
याचांगिरसा साकं धाम स्वायंभुवं प्रभो ॥२६॥ चित्रकेतुस्तु विद्यां तां यथा नारदभाषितं ॥ धार
यामास सप्ताहमपभक्षः सुसमाहितः ॥२७॥ ततश्च सप्तरात्रांते विद्यया धार्यमाणया ॥ विद्या
धराधिपत्यं स लेभेप्रतिहतं नृप ॥२८॥ ततः कतिपयाहोभिः विद्ययेद्धमनोगतिः ॥ जगाम
देवदेवस्य शेषस्य चरणांतिकं ॥२९॥ मृणालगौरं शितिवाससंस्फुरत्किरीटकेयूरकटि
त्रकंकणं ॥ प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमंडलैः प्रभुः ॥३०॥ तंदर्शनाध्वस्त राम०
समस्तकिल्बिषः स्वस्थामलांतःकरणोभ्ययान्मुनिः ॥ प्रवृद्धभक्त्या प्रणयाश्रुलोचनः ॥ प्रहृष्ट ३२
रोमानमदादिपुरुषं ॥३१॥ स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रे

मोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरं ॥३२॥ ततः समाधाय मनो मनीषया बभा
षएतत्प्रयतोऽवागीश्वरः ॥ नियम्य सर्वेंद्रियबाह्यवर्त्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं ॥३३॥ चित्र
केतुरुवाच ॥ अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवताविजितास्तेपि च
भजतामकामात्मनां य आत्मदोतिकरुणः ॥३४॥ तव विभवः खलु भगवान् जगदुदयस्थि
तिलयादीनि ॥ विश्वसृजस्तेंशांशास्तत्र मृषा स्पर्द्धंति पृथगभिमत्या ॥३५॥ परमाणुप
रममहतोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः ॥ आदावंते च सत्वानां यद्ध्रुवं तदेवांतरालेपि ॥
३६॥ क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरंडकोशः ॥ यत्र पतत्यणुकल्पः सहांडकोटि
कोटिभिस्तदनंतरः ॥३७॥ विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वां ॥ तेषामाशिष
ईशातदनु विनश्यंति यथा राजकुलं ॥३८॥ कामधियस्त्वयि रचिता न परम रोहंति यथा करं
भबीजानि ॥ ज्ञानात्मन्यगुणमये गुणगणतोस्य द्वंद्वजालानि ॥३९॥ जितमजित तदा भवता
यदाहं भागवतं धर्ममनवद्यं निःकिंचना ये मुनयः ॥ आत्मारामा यमुपासतेऽपवर्गाय ॥४०॥

भा०ष०
३३

विषममतिर्नयत्र नृणां त्वमहमितिममतवेति वयदन्यत्र ॥ विषमधियारचितोयः सह्यविशुद्ध
क्षयिष्णुरधर्मबहुलः ॥४१॥ कः क्षेमोनिजपरयोः कियानर्थः स्वपरद्रुहाधर्मेण ॥ स्वद्रोहात्तव
कोपपरसंपीडयाचतथाधर्मः ॥४२॥ नव्यभिचरतितवेक्षायया ह्यभिहितोभागवतोधर्मः ॥
स्थिरचरसत्वकदंबेष्वपृथग्धियोयमुपासतेत्वार्याः ॥४३॥ नहिभगवन्नघटितमिदंत्वद्दर्श
नान्नृणामखिलपापक्षयः ॥ यन्नामसकृच्छ्रवणात्पुक्कसोपिमुच्यतेसंसारात् ॥४४॥ अथ
भगवन्वयमधुनात्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणायत्कथितंतावकेनकथ
मन्यथाभवति ॥४५॥ विदितमनंतसमस्तंतवजगदात्मनोजनैरिहाचरितं ॥ विज्ञाप्यंपरमगु
रोः कियदिवसवितुरिवखद्योतैः ॥४६॥ नमस्तुभ्यंभगवतेसकलजगत्स्थितिलयोदयेशायदु
रवसितात्मगतये ॥ कुयोगिनांभिदा ---- परमहंसाय ॥४७॥ यंवैश्वसंतमनुविश्वसृजः श्व
संतियंचेकितानमनुचित्तयउच्चकंति ॥ भूमंडलंसर्षपायतियस्यमूर्द्धितस्मैनमोभगवते
स्तुसहस्रमूर्तये ॥४८॥ शुकोवाच ॥ संस्तुतोभगवानेवमनंतस्तमभाषत ॥ विद्याधरपतिं

राम०
३३

शीतस्त्विय्यच्युते तं कुरूद्वह ॥४९॥ श्रीभगवानुवाच ॥ यन्नारदांगिरोभ्यां ते व्याहृतं मेनुशासनं ॥
संसिद्धोसि तया राजन् विद्यया दर्शनाच्च मे ॥५०॥ अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥५१॥ लोके विततमात्मानं लोकं चात्मनि संततं ॥
उभयं च मया व्याप्तं मयि चैवोभयं कृतं ॥५२॥ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ॥
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥५३॥ एवं जागरणादीनि जीवस्थानानि चा
त्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥५४॥ येन प्रसुप्तः पुरुषः स्वापं वेदा
त्मनस्तदा सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां ॥५५॥ उभयं स्मरतः पुंसः स्वाप
प्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परं ॥५६॥ यदेतद्विस्मृतं पुंसो मद्भावं
भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥५७॥ लब्ध्वेह मानुषीं योनिं ज्ञानवि
ज्ञानसंभवां ॥ आत्मानं यो न मुच्येत न क्वचित् क्षेममाप्नुयात् ॥५८॥ स्मृत्वेहायां परिक्लेशं ततः

फलविपर्ययं ॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत् कवि ॥५९॥ सुखाय दुःखमोक्षाय कुर्वा
ते दंपती क्रिया ॥ ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥६०॥ एवं विपर्ययं बुध्वा नृणां
विज्ञाभिमानिनां ॥ आत्मानश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां ॥६१॥ दृष्टश्रुताभिर्मा
त्राभिर्निर्मुक्तः स्वेन तेजसा ॥ ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत् ॥६२॥ एतावानेव
मनुजैः योगनैपुण्यबुद्धिभिः ॥ स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ॥६३॥ त्वमेतच्छ्र
द्धया राजन्नप्रमत्तो वचो मम ॥ ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यति ॥६४॥ श्रीशुको
वाच ॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ॥ पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे ह
रि ॥६५॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे षोडशोऽध्यायः ॥१६॥ ततः सप्तदशे मो
घमहर्षाप्य खेचरन् ॥ विहस्य गिरिशं शापात् उमाया वृत्रतां गत ॥ ॥श्रीशुक उवा
च ॥ ततश्चांतर्हितोऽनंतस्तस्यै कृत्वा दिशे नमः ॥ विद्याधरश्चित्रकेतुश्चचार गगनेच
रः ॥१॥ स लक्षं वर्षलक्षाणां अव्याहतबलेंद्रियः ॥ स्तूयमानो महायोगी मुनिभिः सिद्धचा

रलैः ॥२॥ कुलाचलेंद्रद्रोणीषुनानासंकल्पसिद्धिषु ॥ रेमे विद्याधरःस्त्रीभिर्गाययन् हरिमीश्वरं ॥३॥
एकदासविमानेन विरुद्दतेभास्वता ॥ गिरिशंददृशो गच्छन्परीतं सिद्धचारणैः ॥ आलिंग्यांकीकृ
तांदेवीं बाहुनामुनिसंसदि ॥ उवाचदेव्याः श्रृण्वत्याजहासो च्चैस्तदंतिके ॥५॥ चित्रकेतुरुवाच ॥ ए
षलोकगुरुःसाक्षाद्धर्मवक्ताशरीरिणां ॥ आस्तेमुख्यः सभायांवैमिथुनीभूयभार्यया ॥६॥ जटा
धरस्तीव्रतपाब्रह्मवादिसभापतिः ॥ अंकीकृत्यस्त्रियंचास्तेगतह्रीःप्राकृतोयथा ॥७॥ प्रायशः
प्राकृताश्चापिस्त्रियंरहसिबिभ्रति ॥ अयंमहाव्रतधरोबिभर्तिसदसिस्त्रियं ॥८॥ श्रीशुकउवाच ॥
भगवानपितच्छ्रुत्वाप्रहस्यागाधधीर्नृप ॥ तूष्णींबभूवसदसिसभ्याश्चतदनुव्रताः ॥९॥ इत्यतद्वी
र्यविदुषिब्रुवाणेबह्वशोभनं ॥ रुषाहदेवीधृष्टायनिर्जितात्माभिमानिने ॥१०॥ पार्वत्युवाच ॥
अयंकिमधुनालोकेशास्तादंडधरःप्रभु ॥ अस्मद्विधानांदुष्टानांनिर्लज्जानांचविप्रकृत ॥११॥
नवेदधर्मंकिलपद्मयोनिर्नब्रह्मपुत्राभृगुनारदाद्याः ॥ नवैकुमारः कपिलोमनुश्चयेनोनिषे
धंत्यतिवर्तिनंहरं ॥१२॥ एषामनुध्येयपदाब्जयुग्मंजगद्गुरुंमंगलमंगलंस्वयं ॥ यःक्षत्रबंधुः
परिभूयसूरीन्प्रशास्तिधृष्टस्तदयंहिदंड्यः ॥१३॥ नायमर्हतिवैकुंठपादमूलोपसर्पणं ॥ संभा

भा० ष०
३५

वितमतिः स्तब्धः साधुभिः पर्युपासितं ।।१४।। अतः पापीयसीं योनिमासुरीं याहि दुर्मते ।। यथेह भू-
यो महतां न कर्त्ता पुत्र किल्बिषं ।।१५।। श्रीशुक उवाच ।। एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः ।।
प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ।।१६।। चित्रकेतुरुवाच ।। प्रतिगृह्णामि ते शापमात्म-
नोंजलिनांबिके ।। देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् ।।१७।। संसारचक्र एतस्मिन् जंतु-
रज्ञानमोहित ।। भ्राम्यन् सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा ।।१८।। नैवात्मा न परश्चापि कर्त्ता
स्यात्सुखदुःखयोः ।। कर्त्तारं मन्यते प्राज्ञ आत्मानं परमेव च ।।१९।। गुणप्रवाह एतस्मिन् कः शा-
पः को न्वनुग्रहः ।। कः स्वर्गो नरकः को वा किं सुखं दुःखमेव च ।।२०।। एकः सृजति भूतानि भ-
गवानात्ममायया ।। एषां बंधं च मोक्षं च सुखं दुःखं निष्कलः ।।२१।। न तस्य कश्चिद्दयितः प्रती-
पो न ज्ञातिबंधुर्न परो न च स्व ।। समस्य सर्वत्र निरंजनस्य सुखे न रागः कुत एव रोषः ।।२२।। तथा-
पि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ।। बंधाय मोक्षाय च मृत्युजन्मनोः श-
रीरिणां संसृतयेवकल्पते ।।२३।। अथ प्रसादये न त्वां शापमोक्षाय भामिनि ।। यन्मन्यसे ह्य-

साधुवादंसमस्तंतन्नम्यतांसती॥२४॥श्रीशुकोवाच॥इतिप्रसाद्यगिरिशौचित्रकेतुररिंदम॥
जगामस्वविमानेनपश्यतोःस्मयतोस्तयोः॥२५॥ततस्तुभगवान्रुद्रोरुद्राणीमिदमब्र
वीत्॥देवर्षिदैत्यसिद्धानांपार्षदानांचशृण्वतां॥२६॥रुद्रोवाच॥दृष्टवत्यसिसुश्रो
णिहरेरद्भुतकर्मणां॥माहात्म्यंभृत्यभृत्यानांनिस्पृहाणांमहात्मनां॥२७॥नारायणपराःस
र्वेनकुतश्चनबिभ्यति॥स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः॥२८॥देहिनांदेहसंयो
गात्द्वंद्वानीश्वरलीलया॥सुखंदुःखंमृतिर्जन्मशापोनुग्रहएवच॥२९॥अवि
वेककृतःपुंसोह्यर्थभेदइवात्मनि॥गुणदोषविकल्पश्चभिदेवस्रजिवत्कृत॥३०॥वा
सुदेवेभगवतिभक्तिमुद्वहतांनृणां॥ज्ञानवैराग्यवीर्याणांनेहकश्चिद्व्यपाश्रयः॥३१॥
नाहंविरंचोनकुमारनारदौनब्रह्मपुत्रामुनयःसुरेशाः॥विदामयस्येहितमंशकांश
कानतत्स्वरूपंपृथगीशमानिनः॥३२॥नह्यस्यास्तिप्रियःकश्चिन्नाप्रियःस्वपरोपिवा॥
आत्मत्वात्सर्वभूतानांसर्वभूतप्रियोहरिः॥३३॥तस्यचायंमहाभागश्चित्रकेतुःप्रियो

नुगः ॥ सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः ॥ ३४ ॥ तस्मान्न विस्मयः कार्यो युत्तेषु महात्म
सु ॥ महापुरुषभक्तेषु शांतेषु समदर्शिषु ॥ ३५ ॥ श्रीशुक उवाच ॥ इति श्रुत्वा भगवतः शि
वस्योमाभिभाषितं ॥ बभूव शांतधी राजन् देवी विगतविस्मया ॥ ३६ ॥ इति भागवतो दे
व्याः प्रतिशप्तुमलं तमः ॥ मूर्ध्ना स जगृहे शापमेतावत्साधुलक्षणं ॥ ३७ ॥ जज्ञे त्वष्टुर्द
क्षिणाग्नौ दानवीं योनिमाश्रितः ॥ वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥ एत
त्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ॥ ३९ ॥
इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः ॥ माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमु
च्यते ॥ ४० ॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् ॥ इतिहासं हरिं स्मृत्वा स या
ति परमां गतिं ॥ ४१ ॥ इति भागवते षष्ठस्कंधे सप्तदशोऽध्यायः ॥ १७ ॥ आदित्यानां चतुर्थ
स्य त्वष्टुर्वंशः प्रसंगतः ॥ प्रोक्तमिंद्रकृतं विश्वरूपवृत्रवधादिकं ॥ आदितेः पंचमादीनां
पुत्राणां मन्वयोक्तिभिः ॥ अष्टादशे दितेर्गर्भे शक्रेण मरुतां भिदा ॥ त्वष्टुर्वंशमनुक्रम्य

पंगंयथाक्रमं॥आदित्यानामथान्येषांवंशानाहमुनीश्वरः इत्तकन्यान्वयानुकथने॥ ॥शु
कउवाच॥पृश्निस्तुपत्नीसवितुसावित्रीव्याहृतित्रयीं॥अग्नीहोत्रंपशुंसोमंचातुर्मास्यमहामखान्॥
१॥सिद्धिर्भगस्यभार्यांगमहिमानंविभुंप्रभुं॥आशिषंचवरारोहांकन्यांप्रासूतसुव्रत॥२॥धातुकु
हूः शिनीवालीराकाचानुमतिस्तथा॥सायंदर्शमथप्रातःपूर्णमासमनुक्रमात्॥अग्नीन्पुरीष्या
नाधत्तक्रियायांसमनंतरः॥३॥चर्षणीवरुणस्यासीत्यस्यांजातोभृगुपुनः॥वाल्मीकिश्चम
हायोगीवाल्मीकादभवत्किल॥४॥अगस्त्यश्चवशिष्टश्चमित्रावरुणयोरृषीरेतःशिषिचतुः
कुंभेउर्वस्यासन्निधौद्रुतं॥५॥रेवत्यांमित्रउत्सर्गमरिष्टंपिप्पलंव्यधात्॥पौलोम्यामिंद्रआध
त्तत्रीन्पुत्रनितिनःश्रुतं॥६॥जयंतमृषभंताततृतीयंमीढुषंप्रभुं॥७॥उरुक्रमस्यदेवस्यमायावा
मनरूपिणः॥कीर्तौपत्न्यांवृहछ्लोकःतस्यासन्सौभगादयः॥८॥तत्कर्मगुणवीर्याणिकश्यप
स्यमहात्मनः॥पश्चाद्वक्ष्यामहेदित्यांयथैवावततारह॥९॥अथकश्यपदायादान्दैतेयान्की
र्तयामिते॥यत्रभागवतःश्रीमान्प्रह्लादोवलिरेवच॥१०॥दितेर्द्वावेवदायादौदैत्यदानव
वंदितौ॥हिरण्यकशिपुर्नामहिरण्याक्षश्चकीर्तितौ॥११॥हिरण्यकशिपोर्भार्याकाया

धुर्नाम दानवी ॥ जंभस्य तनयाद्त्ता सुषुवे चासुरः सुतान् ॥१२॥ संह्रादं प्रागनुह्रादं ह्रादं प्रह्लादमेव
च ॥ तत्स्वसा सिंहिका नाम राहुं विप्रचितोग्रहीत् ॥१३॥ शिरोहरद्यस्य हरिश्चक्रेण पिवतोमृ
तं ॥ संह्रादस्य कृतिर्भार्यासूत पंचजनं ततः ॥१४॥ ह्रादस्य धमनी भार्यासूत वातापिमिल्वणः ॥
योगस्त्याय त्वतिथये पेचे वातापिमिल्वलं ॥१५॥ अनुह्रादस्य सूर्यायां वाष्कलो महिषस्त
था ॥ विरोचनस्तु प्राह्लादिर्देव्यास्तस्याभवद्बलिः ॥१६॥ बाणज्येष्ठं पुत्रशतमशनायां
तोभवत् ॥ तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥१७॥ बाण आराध्य गिरिशं लेभेत
द्गणमुख्यतां ॥ यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥१८॥ मरुतश्च दितेः पुत्राश्चत्वा
रिंशन्नवाधिकाः ॥ त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मतां ॥१९॥ राजोवाच ॥ कथंत
आसुरं भावमपोह्यौत्पत्तिकं गुरो ॥ इंद्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥२०॥ इमेश्र
द्दधते ब्रह्मन्नृषयो हि मया सह ॥ परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥२१॥ सू
तोवाच ॥ तद्विष्णुरातस्य स बादरायणिर्वचो निशम्याहृतमल्पमर्थवत् ॥ सभाजयन्सं

मितेन चेतसा जगादसत्त्वायल सर्वदर्शनः॥ श्रीशुक उवाच॥ हतपुत्रा दितिः शक्रपार्ष्णि
ग्राहेण विष्णुना॥ मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत्॥ २४॥ कदा नु भ्रातृहंता
रमिंद्रियाराममुल्बणं॥ अक्लिन्नहृदयं पापं घातयित्वा शयेसुखं॥ २५॥ कृमिविड्भस्म
संज्ञासीद्यस्येशाभिहितस्य च॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥ २६॥ आ
शासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः॥ मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे॥ २७॥ इति
भावेन सा भर्तुराचचारासकृत्प्रियं॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च॥ २८॥ भक्त्या
परमया राजन्मनोज्ञैर्वल्गुभाषितैः॥ मनो जग्राह भावज्ञा सुस्मितापांगवीक्षणैः॥ ३०॥
एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया॥ बाढमित्याह विवशो न तच्चित्रं हि योषिति॥
३१॥ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः॥ स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मति
र्हृता॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रियाः॥ प्रहस्य परमःप्रीतो दितिमाहाभिनं
द्य च॥ ३३॥ कश्यप उवाच॥ वरं वरय वामोरु प्रीतस्तेहमनिंदिते॥ स्त्रिया भर्तरि सुप्रीते कः का

भा०ष०
३९

मरहचागमः॥पतिरेवहिनारीणांदैवतंपरमंस्मृतं॥मानसःसर्वभूतानांवासुदेवःश्रियःप
तिः॥३४॥सएवदेवतालिंगैर्नामरूपविकल्पितैः॥इज्यतेभगवान्पुंभिःस्त्रीभिश्चपतिरू
पधृक्॥३५॥तस्मात्पतिव्रतानार्यःश्रेयस्कामाःसुमध्यमे॥यजंतेनन्यभावेनपतिमात्मा
नमीश्वरं॥३६॥सोहंत्वयार्चितोभद्रेईदृग्भावेनभक्तितः॥तंतसंपादयेकाममसतीनांसुदु
र्लभे॥३७॥दितिरुवाच॥वरदोयदिमेब्रह्मन्पुत्रमिंद्रहणंवृणे॥अमृत्युंमृतपुत्राहंयेन
मेघातितौसुतौ॥३८॥निशम्यतद्वचोविप्रोविमनाःपर्यतप्यत॥अहोअधर्मःसुमहा
नद्यमेसमुपस्थितः॥३९॥अहोअर्थेंद्रियारामोयोषिन्मय्येवमायया॥गृहीतचेताः
कृपणःपतिष्येनरकेध्रुवं॥४०॥कोतिक्रमोनुवर्तंत्याःस्वभावमिहयोषितः॥धिग्मांबता
बुधंस्वार्थेयदहंत्वजितेंद्रियः॥४१॥शरत्पद्मोत्सवंवक्त्रंवचश्चश्रवणामृतं॥हृदयंक्षु
रधाराभंस्त्रीणांकोवेदचेष्टितं॥४२॥नहिकश्चित्प्रियःस्त्रीणामंजसास्वाशिषात्मनां॥ राम०
पतिंपुत्रंभ्रातरंवाघ्नंत्यर्थेघातयंतिच॥४३॥प्रतिश्रुतंददामीतिवचस्तन्नमृषाभवेत्॥वधना
र्हतिचेंद्रोपितत्रेदमुपकल्प्यते॥४४॥इतिसंचिंत्यभगवान्मारीचःकुरुनंदन॥उवाचकिंचि ३९

क्षिप्त्वात्मानंचविगर्हयन्॥४५॥कश्यपोवाच॥पुत्रस्तेभवितानाभद्रेइंद्रहादेवबांधवः॥सं
वत्सरंव्रतमिदंयद्यंजोधारयिष्यसि॥४६॥दितिरुवाच॥धारयिष्येव्रतंब्रह्मन्ब्रूहिकार्या
णिमेनेमे॥यानिचेहानिषिद्धानिनव्रतंघ्नंतियान्युत॥४७॥कश्यपोवाच॥नहिंस्याद्भू
तजातानिनशपेन्नानृतंवदेत्॥नछिंद्यान्नखरोमाणिनस्पृशेद्यदमंगलं॥४८॥नाप्सु
स्नायान्नकुप्येतनसंभाषेतदुर्जनैः॥नवसीताधौतवासःस्रजंचविधृतांक्वचित्॥४९॥
नोच्छिष्टंचंडिकान्नंचसामिषंवृषलाहृतं॥भुंजीतोदक्ययादृष्टंपिबेदंजलिनात्वपः॥
५०॥नोच्छिष्टास्पृष्टसलिलासंध्यायांमुक्त मूर्द्धजा॥अनर्चितासंयतवाग्नासंवीता
बहिश्चरेत॥५१॥नाधौतपादाप्रयतानार्द्रपान्नोदकुशिरा॥शयीतनापराङ्ना
न्यैर्ननग्नानचसंध्ययोः॥५२॥धौतवासाःशुचिर्नित्यंसर्वमंगलसंयुता॥पूजयेत्प्रातरा
शात्प्राक्गोविप्रान्श्रियमच्युतं॥५३॥स्त्रियोवीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः॥प
तिंचार्च्योपतिष्ठेतध्यायेत्कोष्ठगतंचतं॥५४॥सांवत्सरंपुंसवनंव्रतमेतदविप्लुतं॥धा
रयिष्यतिचेत्तुभ्यंशक्रहाभवितासुतः॥५५॥बाढमित्यभिप्रेत्याथदितिराजन्महामनाः॥

कश्यपं गर्भमाधत्त व्रतं चांजो दधर सा ॥५६॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रू
षणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥५७॥ नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ॥ पत्रां
कुरमृदोऽपश्च काले काले उपाहरत् ॥५८॥ एवं तस्या व्रतस्थाया व्रतछिद्रं हरिर्नृप ॥ प्रे
प्सुः पर्यचरन् जिह्मो मृगहेव मृगाकृतिः ॥५९॥ नाध्यगछत् व्रतछिद्रं तत्परोऽथ मही
पते ॥ चिंतां तीव्रां गतः शक्रः केन मे स्याछिवं त्विह ॥६०॥ एकदा सा तु संध्यायामुछिष्टा
व्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ॥६१॥ लब्ध्वा तदंतरं शक्रो नि
द्रापहृतचेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया ॥६२॥ चकर्त सप्तधा गर्भं वज्रे
ण कनकप्रभं ॥ रुदंतं सप्तधैकैकं मा रोदीरिति तान् पुनः ॥६३॥ ते तमूचुः पाट्यमा
नाः सर्वे प्रांजलयो नृप ॥ नो जिघांससि किमिंद्र भ्रातरो मरुतस्तव ॥६४॥ मा भैष्ट भ्रात
रो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान् पार्षदानात्मनो मरुतां गणान् ॥६५॥ न
ममार दितेर्गर्भः श्रीनिवासानुकंपया बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवा

गा ॥ सन्नद्दृष्ट्वा दितिं पुरुषो ह्यातिसाम्यतां ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥
६७॥ सजूरिंद्रेण पंचाशद्देवासो मरुतोभवन् ॥ व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृ
ताः ॥६८॥ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इंद्रेण सहितान् देवी पर्यतुष्य
दनिंदिता ॥६९॥ अथेंद्रमाह ताताहमादित्यानां भयावहं ॥ अपत्यमिच्छंत्यचरं व्रत
मेतत्सुदुष्करं ॥७०॥ एकः संकल्पितः पुत्रः सप्त सप्ताभवन् कथं ॥ यदि ते वेदितुं पुत्र स
त्यं कथय मा मृषा ॥७१॥ इंद्र उवाच ॥ अंब तेहं व्यवसितमुपधार्यागतोंतिकं ॥ लब्धांत
रोछिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥७२॥ कृत्तो मे सप्तधा गर्भ आसन् सप्तकुमारकाः ॥
तेपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥७३॥ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसि
तं मया ॥ महापुरुषपूजायाः सिद्धिः काप्यनुषंगिणी ॥७४॥ आराधनं भगवत ईहमाना नि
राशिषः ये तु नेच्छंत्यपि परं स्वार्थकुशलाः स्मृताः ॥ ७५॥ =आरा॰ आत्मप्रदं देवं स्वात्मानं ज
गदीश्वरं ॥ को वृणीत गुणस्पर्शं बुधः स्यान्नरकेपि यत् ॥७६॥ तदिदं मम दौर्जन्यं बा

भा०ष० लिशास्समहीयसि ॥ हंतुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥७७॥ श्रीशुकोवाच ॥ इंद्रस्तयाभ्यनुज्ञा
४० तः शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥७८॥ एवं ते सर्वमाख्यातं यन्मां त्वं परि
पृच्छसि ॥ मंगलं मरुतां जन्म किं भूयः कथयामि ते ॥८०॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे अष्टा
दशोध्यायः ॥१८॥ उनविंशोत्र यत्प्रोक्तं कश्यपेन दितेर्व्रतं ॥ तदेव विततं लोके हिताय हरितोषणं ॥१॥
॥ ॥ राजोवाच ॥ व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितं ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसी
दति ॥२॥ श्रीशुक उवाच ॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ॥ प्रारभेत व्रतमिदं सार्वकामिक
मादितः ॥३॥ निशम्य मरुतां जन्म ब्राह्मणाननुमंत्र्य च ॥ स्नात्वा शुक्लदती शुक्ले वसीतालंकृतां
बरे ॥ पूजयेत्प्रातराशात्प्राक् भगवंतं श्रिया सह ॥३॥ अलं ते निरपेक्षाय पूर्णकाम नमोस्तु ते ॥ म
हाविभूतिपतये नमः सकलसिद्धये ॥४॥ यथा त्वं कृपया भूत्या तेजसा महिमौजसा ॥ जुष्ट ईश गु
णैः सर्वैस्ततोसि भगवान्प्रभुः ॥ विष्णुपत्नी महामाये महापुरुषलक्षणे ॥ प्रियेथा मे महाभागे लो रामं०
कमातर्नमोस्तु ते ॥६॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभू ४०
तिभिः बलिमुपाहरामीति ॥७॥ अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवास

उपवीतं विभूषणं गंधपुष्पधूपदीपोपचाराश्च समाहित उपाहरेत्॥ हविःशेषं च जुहुयात्अ
नले द्वादशाहुतीः॥८॥ ॐनमोभगवते महापुरुषाय महाविभूतिपतये स्वाहेति॥ श्रियं विष्णुं च वर
दावाशिषां प्रभवावुभौ॥ भक्त्यासंपूजयेन्नित्यं यदीछेत्सर्वसंपदः॥ प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वे
न चेतसा॥ दशवारं जपेन्मंत्रं ततस्तोत्रमुदीरयेत्॥९॥ युवां तु विश्वस्य विभू जगतः कारणं परं॥
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया॥१०॥ तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः॥ त्वं
सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्॥११॥ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान्॥ त्वं
हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रियाशया॥१२॥ नामरूपे भगवती प्रत्ययस्त्वमपाश्रय यथा युवां
त्रिलोकस्य वरदौ परमेष्ठिनौ॥ तथा म उत्तमश्लोक संतु सत्या महाशिषः॥१३॥ इत्यभिष्टूय वरदं श्री
निवासं श्रिया सह॥ तन्निःसार्योपहरणं दत्वाचमनमर्चयेत्॥१४॥ ततः स्तुवीत स्तोत्रेण भक्तिप्र
ह्वेन चेतसा॥ यज्ञोछिष्टमवघ्राय पुनरभ्यर्चयद्धरिं॥ पतिं च परया भक्त्या महापुरुषचेतसा॥
प्रियैस्तैस्तैरुपंरमेत् प्रेमशीलः स्वयं पतिः॥१६॥ बिभृयात् सर्वकर्माणि पत्न्या उच्चावचानि च॥

हुतमेकतरेणापिद्वंपत्नोरुभयोरपि॥१७॥पत्न्यांकुर्यादनर्हायांपतिरेतत्समाहितः॥विष्णोर्व्रतमि
दंबिभ्रन्नविहन्यात्कथंचन॥१८॥विप्रान्स्त्रियोवीरवतीःस्रगंधबलिमंडितैः॥अर्च्चेदहरहर्भ
क्त्यादेवंनियममास्थित॥१९॥उद्वास्यदेवंस्वेधाम्नितन्निवेदितमग्रतः॥अद्यादात्मविशुद्ध्यर्थंसर्वका
मर्द्धयेत्तया॥२०॥एतेनपूजाविधिनामासान्द्वादशहायनं॥नीत्वाथोपरमेत्साध्वीकार्त्तिकेच
रमेहनि॥२१॥श्वोभूतेऽपउपस्पृश्यकृष्णमभ्यर्च्यपूर्ववत्॥पयःश्रितेनजुहुयात्चरुणासहसर्पि
षा॥२२॥पाकयज्ञविधानेनद्वादशैवाहुतीःपतिः॥आशिषःशिरसादायद्विजैःप्रीतैःसमीरिताः॥२३॥
प्रणम्यशिरसाभक्त्याभुंजीततदनुज्ञया॥आचार्यमग्रतःकृत्वावाग्यतःसहबंधुभिः॥दद्यात्पत्न्यैच
रोःशेषंसुप्रजास्त्वंसुसौभगं॥२४॥एतच्चरित्वाविधिवद्व्रतंविभोरभीप्सितार्थंलभतेपुमानिह॥स्त्री
त्वेतदास्थायलभेतसौभगंश्रियंप्रजांजीवपतिंयशोगृहं॥२५॥कन्याचविंदेतसमग्रलक्षणंवरं
त्ववीराहतकिल्बिषागतिं॥मृतप्रजाजीवसुताधनेश्वरीसुदुर्भगासुभगारूपमग्र्यं॥२६॥विंदे
द्विरूपाविरुजाविमुच्यतेयआमयावींद्रियकल्यदेहं॥एतत्पठन्नभ्युदयेचकर्मण्यनंततृप्तिःपि
तृदेवतानां॥२७॥तुष्टाःप्रयच्छंतिसमस्तकामान्होमावसानेहुतभुक्श्रीहरिश्चराजन्महन्मरुतांजन्म
पुण्यंदितेर्व्रतंचाभिहितंमहत्ते॥२८॥इतिश्रीभागव
तेमहापु॰षष्ठस्कं॰पुंसवनकथनंनामएकोनविंशोध्यायः॥१९॥
॥षष्ठस्कंधसंपूर्ण॥